स्तवसुमनांजलिः

रामकृष्ण मठ, नागपूर

स्तवसुमनांजलिः

रामकृष्ण मठ
नागपूर

० प्रकाशक ०
स्वामी व्योमरूपानंद
अध्यक्ष, रामकृष्ण मठ
धंतोली, नागपूर–४४००१२.

श्रीरामकृष्ण-शिवानंद-स्मृतिग्रंथमाला
पुष्प १०० वे

[व ८० : प्र १०]

—मुद्रक—
श्री. अं. पु. तापस
गिरिजा प्रिंटर्स
सुभाष रोड, नागपूर–४४००१८

मूल्य ५ रुपये

प्रस्तावना

'स्तवसुमनांजलि:' हे शभर संस्कृत स्तोत्रांचा संग्रह असलेले आमचे नवे प्रकाशन वाचकांना सादर करताना आम्हाला अत्यंत आनंद होत आहे.

ईशस्तवन वा परमेश्वराचे गुणगान हे उपासनेचे एक महत्त्वपूर्ण अंग असल्याचे जगातील सर्वच धर्मांनी मान्य केलेले आहे. इतिहासपूर्व काळापासून अगणित भक्त-साधक भगवद्भक्तीने तल्लीन होऊन व उत्कट अंत:स्फूर्तीने अभिभूत होऊन विभिन्न स्तोत्रांद्वारे ईश्वराचे भावपूर्ण गुणगान करीत आले आहेत; त्याच्यासमोर व्याकुळ होऊन प्रार्थना करीत आले आहेत व हृदयातील आर्त वेदना त्याच्यासमोर व्यक्त करीत आले आहेत. त्यांनी रचलेली ही स्तोत्रे तेव्हापासून तहत आजतागायत असंख्य मानवांसाठी मन:शांती, निर्मळ आनंद व आध्यात्मिक उन्नती यांचे सोपान बनली आहेत. जरी सर्वच भागांमध्ये अशा स्तोत्रांचा आढळ होत असला तरीही संस्कृत साहित्यात स्तोत्रांचे एक आगळेच महत्त्व आहे.

'स्तूयते अनेन इति स्तोत्रम्'—'ज्याने स्तुती केली जाते ते स्तोत्र' या व्याख्येनुसार स्तोत्रांचे क्षेत्र अत्यंत व्यापक आहे. वेदात तर अशा अनेक विषयांवरील स्तोत्रांचे एक प्रचंड भांडारच आहे. जरी वैदिक स्तुतिगान हे 'सूक्त' या नावाने ओळखले जात असले तरी सूक्त व स्तोत्र यांच्या अर्थात फरक नाही. सूक्ते ही गद्यात्मक व पद्यात्मक अशी दोन्ही प्रकारची आढळतात. यातील काही सर्वार्थाने आध्यात्मिक आहेत तर काहींमध्ये निरनिराळ्या देवतांपाशी आयुरारोग्य, बल, धन-धान्य, सुख-समृद्धी, शांती इत्यादी ऐहिक गोष्टींची याचना केलेली आहे. काही निव्वळ ईशस्तुतिपर आहेत तर कित्येकात पाप-ताप-संकटे यांपासून वाचविण्यासाठी व प्रसन्न होण्यासाठी

भगवंताची प्रार्थना केली आहे. अशा प्रकारे प्रेय व श्रेय, अभ्युदय व निःश्रेयस या दोन्हींसाठी प्रार्थना असलेली कित्येक सूक्ते आढळतात.

पौराणिक स्तोत्रांमध्ये विषयांच्या विविधतेबरोबरच छंदांमधील विविधता, गेयता यांचाही परिपोष झालेला दिसतो. पौराणिक स्तोत्रांतील बहुतेकात आध्यात्मिक उन्नतीला भौतिक समृद्धीहून अधिक महत्त्व देण्यात आले आहे.

वेगवेगळ्या, विशिष्ट, देवतांशी संबंधित स्तोत्रांमध्ये त्या त्या देवतेचे स्वरूप, त्यांचे गुण व त्यांची लीला यांचे वर्णन आढळत असून त्यांची कृपा व प्रसन्नता यांसाठी प्रार्थनाही त्यांत दिसतात. काही स्तोत्रे संबंधित देवतेचे रूपवर्णन व गुणवर्णन यांवर भर देतात तर काहींत प्रार्थनेवर भर असतो. काही स्तोत्रात तत्त्वविचार व सिद्धांत यांना प्राधान्य असते तर काहींमध्ये साधनोपयोगी उपदेशाला. कुठे मोक्षेच्छू साधक आपल्या संकुचित, जखडलेल्या जीवनाची व्यर्थता, संसारातील क्षणिक सुखांची निःसारता, स्वतःची क्षुद्रता व अगतिकता यांच्या जाणिवेने व कोणताही उपाय न दिसल्यामुळे व्याकुळ व आर्त होऊन प्रभूजवळ मुक्तीची याचना करीत आहे; कुठे भगवंताच्या ओझरत्या दर्शनाच्या लाभाने स्तंभित व हर्षभरित होऊन भक्तसाधक भगवंताची अहेतुक कृपा, असीम अनुकंपा व भक्तवत्सलता यांच्या स्मरणाने तन्मय होत आहे तर कुठे शांतभावाचा साधक ज्ञान, भक्ती, वैराग्य इत्यादी आध्यात्मिक संपत्तीने आपले जीवन समृद्ध करण्यासाठी प्रार्थना करीत आहे.

संस्कृत स्तोत्रवाङ्मयातील श्रीशंकराचार्यांचे स्थान तर अद्वितीयच म्हटले पाहिजे. ज्यात शंकराचार्यांच्या उदात्त भावपूर्ण, हृदयस्पर्शी, सुललित स्तोत्रांचा समावेश नाही असा संस्कृत-स्तोत्र-संग्रह सापडणे अशक्यप्रायच ! आचार्यांच्या स्तोत्रांमध्ये आशयघनता, भावगांभीर्य यांबरोबरच प्रासादिकता, श्रुतिमाधुर्य, शब्दलालित्य इत्यादी काव्यगुणांचा जो अपूर्व संगम दृष्टीस पडतो तो खरोखरच अजोड होय.

आकाराच्या दृष्टीनेही स्तोत्रांचे बहुविध प्रकार सापडतात. एक-श्लोकात्मक ध्यानमंत्र प्रणाममंत्र यांपासून तो पंचकम्, षट्कम्, अष्टकम्, दशकम् आदी पाच, सहा, आठ, दहा श्लोकांनी युक्त असलेली अशी असंख्य स्तोत्रे पाहावयास मिळतात. 'शिवमहिम्नःस्तोत्रम्', 'मुकुंदमालास्तोत्रम्' आदी सुदीर्घ स्तोत्रांची संख्याही थोडीथोडकी नाही. स्तोत्रांमधील भावांना अनुरूप असलेले छंद वा वृत्ते यांमुळे या स्तोत्रांमधील भावांना अधिकच उठाव मिळत असतो.

साधक-महापुरुषांनी रचलेली स्तोत्रे, त्यांचे आध्यात्मिक व्यक्तिमत्त्व, त्यांची साधना व अनुभूती यांच्या शक्तीने ओतप्रोत असल्याने त्यांच्यामध्ये सहजच वाचक वा श्रोते यांमध्ये तदनुकूल भावांचे जागरण घडवून त्यांना उच्च भावभूमीवर आरूढ करण्याचे सामर्थ्य असते. या स्तोत्रांचे पठण हा चित्त प्रसन्न, शांत, पवित्र करण्याचा एक अमोघ उपाय आहे. शास्त्रग्रंथां-मधून वर्णिलेल्या कायिक, वाचिक व मानसिक या उपासनेच्या तीन प्रकारां-पैकी 'वाचिक' या प्रकारात स्तोत्रपाठ व जप यांचा समावेश होतो. जपा-प्रमाणेच स्तोत्रपाठाचीही आध्यात्मिक उन्नतीचा सुनिश्चित तरीही सोपा मार्ग म्हणून गणना केली गेली आहे. या स्तोत्रपाठरूपी वाङ्मय-पूजेस सफल करण्यास अंतर्बाह्य शुद्ध, शांत, एकाग्र व श्रद्धासंपन्न होऊन स्पष्ट स्वरात, शुद्ध उच्चारासह, अर्थ व भाव यांचे ग्रहण करीत पठण करण्याचा निर्देशही दिलेला आहे.

प्रस्तुत संकलनात काही प्रसिद्ध शांतिमंत्र व सूक्ते, विविध देवी-देवता-अवतार आदींशी संबंधित ध्यानमंत्र, प्रणाममंत्र व अनेक अर्थगर्भ,लालित्यपूर्ण स्तोत्रांचा समावेश तर आहेच; पण त्याबरोबरच काही साधनोपयोगी उपदेशपर स्तोत्रेही दिली आहेत. श्रीरामकृष्ण-संघाच्या विभिन्न शाखांमधून वेळोवेळी उत्सवप्रसंगी गाइल्या जात असलेल्या बहुतेक सर्वच स्तोत्रांचा यात समावेश आहे. या पुस्तकात सर्वत्र परसवर्णापूर्वी येणाऱ्या अनुनासिकाच्या ठिकाणी अनुस्वाराचा उपयोग केला आहे. (जसे--गङ्गा, पञ्च, खण्ड, मन्द, शम्भु हे शब्द अनुक्रमे गंगा, पंच, खंड, मंद, शंभु असे छापले आहेत.)

सर्वप्रकारचे प्रयत्न करूनही पुस्तकात काही मुद्रणदोष राहून गेले आहेत. वाचकांना अशी नम्र विनंती आहे की पुस्तकाच्या शेवटी जोडलेल्या 'शुद्धिपत्रा'नुसार जागोजागी चुकांची दुरुस्ती करून घ्यावी. या पुस्तकाची आगामी आवृत्ती अनुवादासह छापण्याचा विचार आहे.

शेवटी परम करुणामय प्रभूंच्या श्रीचरणी स्तोत्ररूपी या सुरभित पुष्पांची अंजली अर्पण करताना त्यांनी सर्वांवर प्रसन्न होऊन कृपा करावी हीच प्रार्थना आहे.

नागपूर
१८ नोव्हेंबर १९८०
कार्तिक एकादशी

—प्रकाशक

अनुक्रमणिका

स्तवसुमनांजलिः

वैदिकशांतिवचनानि

ॐ वाङ् मे मनसि प्रतिष्ठिता, मनो मे वाचि प्रतिष्ठितम्, आविरावीर्म एधि, वेदस्य म आणीस्थः, श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् संदधामि, ऋतं वदिष्यामि, सत्यं वदिष्यामि, तन्मामवतु, तद्वक्तारमवतु, अवतु माम्, अवतु वक्तारम्, अवतु वक्तारम् ॥ ॐ शांतिः शांतिः शांतिः ॥१॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शांतिः शांतिः शांतिः ॥२॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इंद्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ ॐ शांतिः शांतिः शांतिः ॥३॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥४॥

---

१. ऋग्वेदः
२. शुक्लयजुर्वेदः, बृहदारण्यकोपनिषत् ५।१।१
३. कृष्णयजुर्वेदः, तैत्तिरीयोपनिषत् १।१.
४. तदेव २।१

ॐ आप्यायंतु ममांगानि, वाक्प्राणश्चक्षुः श्रोत्रमथ बल-मिंद्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं । माऽहं ब्रह्म निराकुर्यां, मा मा ब्रह्म निराकरोदनिराकरणमस्तु, अनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि संतु, ते मयि संतु । ॐ शांतिः शांतिः शांतिः ॥५॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शांतिः शांतिः शांतिः ॥६॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शांतिः शांतिः शांतिः ॥७॥

ॐ द्यौः शांतिरंतरिक्षं शांतिः पृथिवी शांतिरापः शांति-रोषधयः शांतिः वनस्पतयः शांतिर्विश्वेदेवाः शांतिर्ब्रह्म शांतिः सर्वं शांतिः शांतिरेव शांतिः । सा मा शांतिरेधि ॥ ॐ शांतिः शांतिः शांतिः ॥८॥

---

५. सामवेदः
६. अथर्ववेदः । ऋग्वेदः १।८९
७. ऋग्वेदः
८. शुक्लयजुर्वेदः ३६।१७

वैदिकप्रार्थना

असतो मा सद्गमय । तमसो मा ज्योतिर्गमय ।
मृत्योर्माऽमृतं गमय ॥१॥

तेजोऽसि तेजो मयि धेहि । वीर्यमसि वीर्यं मयि धेहि । बलमसि बलं मयि धेहि । ओजोऽस्योजो मयि धेहि । मन्युरसि मन्युं मयि धेहि । सहोऽसि सहो मयि धेहि ॥२॥

मधुमतीसूक्तम्

मधु वाता ऋतायते मधु क्षरंति सिंधवः । माध्वीर्नः संत्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवंतु नः ॥

संज्ञानसूक्तम्

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥१॥
समानो मंत्रः समितिः समानी
समानं मनः सह चित्तमेषाम् ।
समानं मंत्रमभिमंत्रये वः
समानेन वो हविषा जुहोमि ॥२॥
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥३॥

---

१. बृहदारण्यक. १।३।२८. २. वाजसनेयसंहिता १९।९

गुरुस्तोत्रम्

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १
अखंडमंडलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ २
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ३
स्थावरं जंगमं व्याप्तं येन कृत्स्नं चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ४
चिद्रूपेण परिव्याप्तं त्रैलोक्यं सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ५
सर्वश्रुतिशिरोरत्नसमुद्भासितमूर्तये ।
वेदांतांबुजसूर्याय तस्मै श्रीगुरवे नमः ॥ ६
चैतन्यं शाश्वतं शांतं व्योमातीतं निरंजनम् ।
विंदुनादकलातीतस्तस्मै श्रीगुरवे नमः ॥ ७
ज्ञानशक्तिसमारूढस्तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥ ८
अनेकजन्मसंप्राप्तकर्मेंधनविदाहिने ।
आत्मज्ञानाग्निदानेन तस्मै श्रीगुरवे नमः ॥ ९
शोषणं भवसिंधोश्च प्रापणं सारसंपदः ।
यस्य पादोदकं सम्यक् तस्मै श्रीगुरवे नमः ॥ १०
न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥ ११
मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ १२

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ १३
ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिं
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ १४

दक्षिणामूर्तिस्तोत्रम्

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजांतर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षीकुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १
बीजस्यांतरिवांकुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २
यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात् तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३
नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा वहिः स्पंदते ।
जानामीति तमेव भांतमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४

देहं प्राणमपींद्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्री बालांधजडोपमास्त्वहमिति भ्रांत्या भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५

राहुग्रस्तदिवाकरेंदुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यंतःस्फुरंतं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७

विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबंधतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामित-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८

भूरंभांस्यनलोऽनिलोंऽबरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किंचन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात् तदर्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत् तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १०

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ ११
चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ॥ १२
ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रशांताय दक्षिणामूर्तये नमः ॥ १३
निधये सर्वविद्यानां भिषजे भवरोगिणाम् ।
गुरवे सर्वलोकानां दक्षिणामूर्तये नमः ॥ १४
मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठांतेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येंद्रं करकलितचिन्मुद्रमानंदरूपं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १५

गणेशध्यानम्

ॐ खर्वं स्थूलतनुं गजेंद्रवदनं लंबोदरं सुंदरं
प्रस्यंदन्मदगंधलुब्धमधुपव्यालोलगंडस्थलम् ।
दंताघातविदारितारिरुधिरैः सिंदूरशोभाकरं
वंदे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥

गणेशप्रार्थना

देवेंद्रमौलिमंदारमकरंदकणारुणाः ।
विघ्नं हरंतु हेरंबचरणांबुजरेणवः ॥

गणेशप्रणामः

एकदंतं महाकायं लंबोदरं गजाननम् ।
विघ्ननाशकरं देवं हेरंबं प्रणमाम्यहम् ॥

गणेशाष्टकम्

यतोऽनंतशक्तेरनंताश्च जीवा
यतो निर्गुणादप्रमेयो गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥ १

यतश्चाविरासीज्जगत्सर्वमेतत्
तथाब्जासनो विश्वगो विश्वगोप्ता ।
तथेंद्रादयो देवसंघा मनुष्याः
सदा तं गणेशं नमामो भजामः ॥ २

यतो वह्निभानू भवो भूर्जलं च
यतः सागराश्चंद्रमा व्योम वायुः ।
यतः स्थावरा जंगमा वृक्षसंघाः
सदा तं गणेशं नमामो भजामः ॥ ३

यतो दानवाः किन्नरा यक्षसंघा
यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ ४

यतो बुद्धिरज्ञाननाशो मुमुक्षो-
र्यतः सम्पदो भक्तसंतोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः ॥ ५

यतः पुत्रसंपद्यतो वांछितार्थो
यतोऽभक्तविघ्नास्तथाऽनेकरूपाः
यतश्चार्थधर्मौ यतः काममोक्षौ
सदा तं गणेशं नमामो भजामः ॥ ६

यतोऽनंतशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपेण शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना
सदा तं गणेशं नमामो भजामः ॥ ७

यतो वेदवाचो विकुंठा मनोभिः
सदा नेति नेतीति यत्ता गृणंति ।
परब्रह्मरूपं चिदानंदभूतं
सदा तं गणेशं नमामो भजामः ॥ ८

श्रीगणेश उवाच

पुनरूचे गणाधीशः स्तोत्रमेतत्पठेत् तु यः ।
त्रिसंध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥ ९
यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥ १०
यः पठेन्मासमात्रं तु दशवारं दिने दिने ।
स मोचयेद्बंधगतं राजवध्यं न संशयः ॥ ११
विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वांछितांल्लभते सर्वानेकविंशतिवारतः ॥ १२
यो जपेत्परया भक्त्या गजाननपरो नरः ।
एवमुक्त्वा ततो देवश्चांतर्धानं गतः प्रभुः ॥ १३

शिवध्यानम्

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥

शिवप्रणामः

नमः शिवाय शांताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं गतिस्त्वं परमेश्वर ॥

शिवमानसपूजनस्तोत्रम्

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्यांबरं
नानारत्नविभूषितं मृगमदामोदांकितं चंदनम् ।
जातीचंपकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१

सौवर्णे मणिखंडरत्नरचिते पात्रे घृतं पायसं
भक्ष्यं पंचविधं पयोदधियुतं रंभाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखंडोज्ज्वलं
तांबूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदंगकाहलकलागीतं च नृत्यं तथा ।
साष्टांगं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विविधोपभोगरचना निद्रा समाधिस्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४

इत्थं मानसपूजनं शशिभृतः कुर्वन् त्रिसंध्यं नरः
किंवा श्लोकचतुष्टयं प्रतिदिनं पूजावसाने पठन् ।
प्राप्नोतीह समस्तपार्थिवसुखं चांते पदं शूलिनो
व्यासस्तेन महावसानसमये कैलासलोकं गतः ॥ ५

विश्वनाथाष्टकम्

गंगातरंगरमणीयजटाकलापं
गौरीनिरंतरविभूषितवामभागम् ।
नारायणप्रियमनंगमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवंतं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ २

भूताधिपं भुजगभूषणभूषितांगं
व्याघ्राजिनांबरधरं जटिलं त्रिनेत्रम् ।
पाशांकुशाभयवरप्रदशूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ३

शीतांशुशोभितकिरीटविराजमानं
भालेक्षणानलविशोषितपंचवाणम् ।
नागाधिपारचितभासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४

पंचाननं दुरितमत्तमतंगजानां
नागांतकं मनुजपुंगवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ५

तेजोमयं सगुणनिर्गुणमद्वितीय-
मानंदकंदमपराजितमप्रमेयम् ।
नादात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ६

आशां विहाय परिहृत्य परस्य निंदां
पापे रतिं च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ७

रागादिदोषरहितं स्वजनानुरागं
वैराग्यशांतिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ८

वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनंतकीर्तिं
संप्राप्य देहविलये लभते च मोक्षम् ॥ ९

विश्वनाथाष्टकं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ १०

शिवाष्टकम्

प्रभुमीशमनीशमशेषगुणं
गुणहीनमहीशगराभरणम् ।
रणनिर्जितदुर्जयदैत्यपुरं
प्रणमामि शिवं शिवकल्पतरुम् ।। १

गिरिराजसुतान्वितवामतनुं
तनुनिंदितराजितकोटिविधुम् ।
विधिविष्णुशिरोधृतपादयुगं
प्रणमामि शिवं शिवकल्पतरुम् ।। २

शशलांछितरंजितसन्मुकुटं
कटिलंबितसुंदरकृत्तिपटम् ।
सुरशैवलिनीकृतपूतजटं
प्रणमामि शिवं शिवकल्पतरुम् ।। ३

नयनत्रयभूषितचारुमुखं
मुखपद्मपराजितकोटिविधुम् ।
विधुखंडविमंडितभालतटं
प्रणमामि शिवं शिवकल्पतरुम् ।। ४

वृषराजनिकेतनमादिगुरुं
गरलाशनमाजिविषाणधरम् ।
प्रमथाधिपसेवकरंजनकं
प्रणमामि शिवं शिवकल्पतरुम् ।। ५

मकरध्वजमत्तमतंगहरं
करिचर्मगनागविबोधकरम् ।
वरमार्गणशूलविषाणधरं
प्रणमामि शिवं शिवकल्पतरुम् ॥ ६

जगदुद्भवपालननाशकरं
त्रिदिवेशशिरोमणिघृष्टपदम् ।
प्रियमानवसाधुजनैकगतिं
प्रणमामि शिवं शिवकल्पतरुम् ॥ ७

हृदयस्थतमःप्रकरापहरं
नृमनोजनिताघविनाशकरम् ।
भजतोऽखिलदुःखसमिद्धहरं
प्रणमामि शिवं शिवकल्पतरुम् ॥ ८

शिवमहिम्नःस्तोत्रम्

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १

अतीतः पंथानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥ ३

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयी वस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहंतुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५

अजन्मानो लोकाः किमवयववंतोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७

महोक्षः खट्वांगं परशुरजिनं भस्मफणिनः
कपालं चेतीयत् तव वरद तंत्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥ ८

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९
तवैश्वर्यं यत्नाद् यदुपरि विरिंचो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कंधवपुषः ।
ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०
अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकंडूपरवशान् ।
शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११
अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२
यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३
अकांडब्रह्मांडक्षयचकितदेवासुरकृपा-
विधेयस्यासीद् यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कंठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः ॥१४

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तंते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मर स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥१५

महीपादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७

रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो
रथांगे चंद्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडंबरविधि-
र्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः ॥१८

हरिस्ते साहस्रं कमलवलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९

क्रतौ सुप्ते जाग्रत् त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्धा दृढपरिकरः कर्मसु जनः ॥२०

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्तिज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यवसिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
दवैति त्वामद्धा वत वरद मुग्धा युवतयः ॥२३

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः ।
अमंगल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मंगलमसि ॥२४

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमद सलिलोत्संगितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥२५

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति: ।
तुरीयं ते धाम ध्वनिभिरवरुंधानमणुभि:
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७

भव: शर्वो रुद्र: पशुपतिरथोग्र: सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽपि भवते ॥२८

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नम: क्षोदिष्ठाय स्मरहर महिष्ठाय च नम: ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नम: सर्वस्मै ते तदिदमतिसर्वाय च नम: ॥२९

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नम:
प्रबलतमसे तत्संहारे हराय नमो नम: ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नम:
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नम: ॥३०

कृशपरिणति चेत: क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धि: ।
इति चकितममंदीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१

असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२

असुरसुरमुनींद्रैरर्चितस्येंदुमौले-
ग्रंथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगुणवरिष्ठः पुष्पदंताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३३

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ॥३४

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ॥३५

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नः स्तवपाठस्य कलां नार्हंति षोडशीम् ॥३६

कुसुमदशननामा सर्वगंधर्वराजः
शिशुशशधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥३७

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदंतप्रणीतम् ॥३८

आसमाप्तमिदं स्तोत्रं पुण्यं गंधर्वभाषितं ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥३९

इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥४०

तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥४१

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥४२

श्रीपुष्पदंतमुखपंकजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कंठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥ ४३

शिवापराधक्षमापनस्तोत्रम्

आदौ कर्मप्रसंगात्कलयति कलुषं मातृकुक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः ।
यद्यद्वै तत्र दुःखं व्यथयति सततं शक्यते केन वक्तुं
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥१

बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासा
नो शक्तश्चेंद्रियेभ्यो भवगुणजनिताः शत्रवो मां तुदंति ।
नानारोगोत्थदुःखाद् रुदनपरवशः शंकरं न स्मरामि
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो॥२

प्रौढोऽहं यौवनस्थो विषयविषधरैः पंचभिर्मर्मसंधौ
दष्टो नष्टोऽविवेकः सुतधनयुवतीस्वादसौख्ये निषण्णः ।
शैवीचिंताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥३

वार्धक्ये चेंद्रियाणां विगतगतिमतिश्चाधिदैवादितापैः
पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिहीनं च दीनम् ।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥४

नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गे स्मरारे ।
ज्ञातो धर्मो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥५

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गांगतोयं
पूजार्थं वा कदाचिद् बहुतरगहनात्खंडबिल्वीदलानि ।
नानीता पद्ममाला सरसि विकसिता गंधधूपैस्त्वदर्थं
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥६

दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिंगं
नो लिप्तं चंदनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः ।
धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥७

ध्यात्वा चित्ते स्मरारिं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितं बीजमंत्रैः ।
नो तप्तं गांगतीरे व्रतजपनियमै रुद्रजाप्यैर्न वेदैः
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥८

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुंभिते सूक्ष्ममार्गे
शांते स्वांते प्रलीने प्रकटितविभवे ज्योतिरूपे पराख्ये ।
लिंगज्ञे ब्रह्मवाक्ये सकलतनुगतं शंकरं न स्मरामि
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो ॥९

नग्नो निःसंगशुद्धस्त्रिगुणविरहितो ध्वस्तमोहांधकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित् ।
उन्मन्यावस्थया त्वां विगतकलिमलं शंकरं न स्मरामि
क्षंतव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शंभो॥१०

चंद्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे
सर्पैर्भूषितकंठकर्णयुगले नेत्रोत्थवैश्वानरे ।
दंतित्वक्कृतसुंदरांबरधरे त्रैलोक्यसारे हरे
मोक्षार्थं कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः ॥११

किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं
किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम् ।
ज्ञात्वैतत्क्षणभंगुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥१२

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायांति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥१३

शांतं पद्मासनस्थं शशधरमुकुटं पंचवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमपि वरं दक्षिणांगे वहंतम् ।
नागं पाशं च घंटां डमरुकसहितं चांकुशं वामभागे
नानालंकारदीप्तं स्फटिकमणिनिभं पार्वतीशं भजामि॥१४

वंदे देवमुमापतिं सुरगुरुं वंदे जगत्कारणं
वंदे पन्नगभूषणं मृगधरं वंदे पशूनां पतिम् ।
वंदे सूर्यशशांकवह्निनयनं वंदे मुकुंदप्रियं
वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शंकरम् ॥१५

गात्रं भस्मसितं सितं च हसितं हस्ते कपालं सितं
खट्वांगं च सितं सितश्च वृषभः कर्णे सिते कुंडले ।
गंगाफेनसिता जटा पशुपतेश्चन्द्रः सितो मूर्धनि
सोऽयं सर्वसितो ददातु विभवं पापक्षयं सर्वदा ॥१६

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो ॥१७

शिवस्तोत्रम्

निखिलभुवनजन्मस्थेमभंगप्ररोहाः
अकलितमहिमानः कल्पिता यत्र तस्मिन् ।
सुविमलगगनाभे त्वीशसंस्थेऽप्यनीशे
मम भवतु भवेऽस्मिन् भासुरो भावबंधः ॥१

निहतनिखिलमोहेऽधीशता यत्र रूढा
प्रकटितपरप्रेम्णा यो महादेवसंज्ञः ।
अशिथिलपरिरंभः प्रेमरूपस्य यस्य
हृदि प्रणयति विश्वं व्याजमात्रं विभुत्वम् ॥२

वहति विपुलवातः पूर्वसंस्काररूपः
विदलति वलवृंदं घूर्णितेवोर्मिमाला ।
प्रचलति खलु युग्मं युष्मदस्मत्प्रतीतम्
अतिविकलितरूपं नौमि चित्तं शिवस्थम् ॥३

जनकजनितभावो वृत्तयः संस्कृताश्च
अगणनवहुरूपा यत्र चैको यथार्थः ।
शमितविकृतिवाते यत्र नांतर्बहिश्च
तमहह हरमीडे चित्तवृत्तेर्निरोधम् ॥४

गलिततिमिरमालः शुभ्रतेजः प्रकाशः
धवलकमलशोभः ज्ञानपुंजाट्टहासः ।
यमिजनहृदिगम्यो निष्कलो ध्यायमानः
प्रणतमवतु मां सः मानसो राजहंसः ॥५

दुरितदलनदक्षं दक्षजादत्तदोषं
कलितकलिकलंकं कम्रकल्हारकांतम् ।
परहितकरणाय प्राणप्रच्छेदप्रीतं
नतनयननियुक्तं नीलकंठं नमामः ॥६

विष्णुध्यानम्

(१)

ध्येयः सदा सवितृमंडलमध्यवर्ती
नारायणः सरसिजासनसंनिविष्टः ।
केयूरवान् मकरकुंडलवान् किरीटी
हारी हिरण्मयवपुर्धृतशंखचक्रः ॥

(२)

शांताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानिगम्यं
वंदे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

विष्णुप्रणामः

त्रैलोक्यपूजितः श्रीमान् सदाविजयवर्धनः ।
शांतिं कुरु गदापाणे नारायण नमोऽस्तु ते ॥

पुरुषसूक्तम्

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम् ॥१
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२
एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥४

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजंत साध्या ऋषयश्च ये ॥७
तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥८
तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छंदांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥९
तस्मादश्वा अजायंत ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥१०
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥११
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥१२
चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३
नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्॥१४
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥१५
यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥१६

नारायणसूक्तम्

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥१

विश्वतः परमान्नित्यं विश्वं नारायणं हरिम् ।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥२

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥३

नारायणः परो ज्योतिरात्मा नारायणः परः ।
नारायणपरं ब्रह्म तत्त्वं नारायणः परः ।
नारायणपरो ध्याता ध्यानं नारायणः परः ॥४

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥५

अनंतमव्ययं कविं समुद्रेऽतं विश्वशंभुवम् ।
पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् ॥६

अधोनिष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ॥७

संततं शिलाभिस्तु लंबत्याकोशसन्निभम् ।
तस्यांते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥८

तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः ।
सोऽग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः ॥
तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य संतताः ॥९

संतापयति स्वं देहमापादतलमस्तगः ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थिता॥१०

नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा ।
नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा ॥११
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्मा स शिवः स हरिः सेंद्रः
सोऽक्षरः परमः स्वराट् ॥१२
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः ॥

विष्णुषट्पदी

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय संसारसागरतः ॥१
दिव्यधुनीमकरंदे परिमलपरिभोगसच्चिदानंदे ।
श्रीपतिपदारविंदे भवभयखेदच्छिदे वंदे ॥२
सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ॥३
उद्धृत नगनगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः॥४
मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधाम् ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥५
दामोदर गुणमंदिर सुंदरवदनारविंद गोविंद ।
भवजलधिमथनमंदर परमं दरमपनय त्वं मे ॥६
नारायण करुणामय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥७

मुकुंदमालास्तोत्रम्

श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुंठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
त्यालापिनं प्रतिदिनं कुरु मां मुकुंद ॥१

जयतु जयतु देवो देवकीनंदनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुंदः ॥२

मुकुंद मूर्ध्ना प्रणिपत्य याचे
भवंतमेकांतमियंतमर्थम् ।
अविस्मृतिस्त्वच्चरणारविंदे
भवे भवे मेऽस्तु तव प्रसादात् ॥३

नाहं वंदे तव चरणयोर्द्वंद्वमद्वंद्वहेतोः
कुंभीपाकं गुरुमपि हरे नारकं नापनेतुम् ।
रम्यारामामृदुतनुलतानंदने नापि रंतुं
भावे भावे हृदयभवने भावयेयं भवंतम् ॥४

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद् भाव्यं भवतु भगवन्पूर्वकर्मानुरूपम् ।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मांतरेऽपि
त्वत्पादांभोरुहयुगगता निश्चला भक्तिरस्तु ॥५

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकांतक प्रकामम् ।
अवधीरितशारदारविंदौ
चरणौ ते मरणेऽपि चिंतयामि ॥६

कृष्ण त्वदीय पदपंकजपंजरांतम्
अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कंठावरोध्रनविधौ स्मरणं कुतस्ते ॥७

चिंतयामि हरिमेव संततं
मंदमंदहसिताननांबुजम् ।
नंदगोपतनयं परात्परं
नारदादिमुनिवृंदवंदितम् ॥८

करचरणसरोजे कांतिमन्नेत्रमीने
श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ।
हरिसरसि विगाह्यापीय तेजोजलौघं
भवमरुपरिखिन्नः खेदमद्य त्यजामि ॥९

सरसिजनयने सशंखचक्रे
मुरभिदि मा विरमस्व चित्त रंतुम् ।
सुखतरमपरं न जातु जाने
हरिचरणस्मरणामृतेन तुल्यम् ॥१०

माभीर्मंदमनो विचिंत्य वहुधा यामीश्चिरं यातनाः
नामी नः प्रभवंति पापरिपवः स्वामी ननु श्रीधरः ।
आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं
लोकस्य व्यसनापनोदनकरो दासस्य किं न क्षमः ॥११

भवजलधिगतानां द्वंद्ववाताहतानां
सुतदुहितृकलत्रत्राणभारार्दितानाम् ।
विषमविषयतोये मज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम् ॥१२

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथमहमिति चेतो मास्म गाः कातरत्वम् ।
सरसिजदृशि देवे तावकी भक्तिरेका
नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ॥१३

तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले
दारावर्ते तनयसहजग्राहसंघाकुले च ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादांभोजे वरद भवतो भक्तिभावे प्रसीद ॥१४

मा द्राक्षं क्षीणपुण्यान्क्षणमपि भवतो भक्तिहीनान्पदाब्जे
मा श्रौषं श्राव्यबंधं तव चरितमपास्यान्यदाख्यानजातम् ।
मा स्मार्षं माधव त्वामपि भुवनपते चेतसापह्नुवानान्
मा भूवं त्वत्सपर्याव्यतिकररहितो जन्मजन्मांतरेऽपि ॥१५

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वंद्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु ।
कृष्णं लोकय लोचनद्वय हरेर्गच्छांघ्रियुग्मालयं
जिघ्र घ्राण मुकुंदपादतुलसीं मूर्धन्नमाधोक्षजम् ॥१६

हे लोकाः शृणुत प्रसूतिमरणव्याधेश्चिकित्सामिमां
योगज्ञाः समुदाहरंति मुनयो यां याज्ञवल्क्यादयः ।
अंतर्ज्योतिरमेयमेकममृतं कृष्णाख्यमापीयतां
तत्पीतं परमौषधं वितनुते निर्वाणमात्यंतिकम् ॥१७

हे मर्त्याः परमं हितं शृणुत भो वक्ष्यामि संक्षेपतः
संसारार्णवमापदूर्मिबहुलं सम्यक्प्रविश्य स्थिताः ।
नानाज्ञानमपास्य चेतसि नमो नारायणायेत्यमुं
मंत्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥१८

पृथ्वीरेणुरणुः पयांसि कणिकाः फल्गुस्फुलिंगो लघुः
तेजो निःश्वसनं मरुत्तनुतरं रंध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्रपितामहप्रभृतयः कीटाः समस्ताः सुराः
दृष्टे यत्र स तावको विजयते भूमा विधूतावधिः॥१९

बद्धेनांजलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कंठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पांबुना ।
नित्यं त्वच्चरणारविंदयुगलध्यानामृतास्वादिनाम्
अस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥२०

हे गोपालक हे कृपाजलनिधे हे सिंधुकन्यापते
हे कंसांतक हे गजेंद्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुंडरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥२१

भक्तापायभुजंगगारुडमणिस्त्रैलोक्यरक्षामणिः
गोपीलोचनचातकांबुदमणिः सौंदर्यमुद्रामणिः ।
यः कांतामणिरुक्मिणीघनकुचद्वंद्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥२२

शत्रुच्छेदैकमंत्रं सकलमुपनिषद्वाक्यसंपूज्यमंत्रं
संसारोत्तारमंत्रं समुपचिततमःसंघनिर्याणमंत्रम् ।
सर्वैश्वर्यैकमंत्रं व्यसनभुजगसंदष्टसंत्राणमंत्रं
जिह्वे श्रीकृष्णमंत्रं जप जप सततं जन्मसाफल्यमंत्रम् ॥२३

व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्येंद्रार्तिकरौषधं त्रिभुवनीसंजीवनैकौषधम् ।
भक्तात्यंतहितौषधं भवभयप्रध्वंसनैकौषधं
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥२४

आम्नायाभ्यसनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदश्छेदफलानि पूर्तविधयः सर्वं हुतं भस्मनि ।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद-
द्वंद्वांभोरुहसंस्मृतिं विजयते देवः स नारायणः ॥२५

श्रीमन्नाम प्रोच्य नारायणाख्यं
के न प्रापुर्वांछितं पापिनोऽपि ।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिं-
स्तेन प्राप्तं गर्भवासादिदुःखम् ॥२६

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीयमदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य-
भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥२७

नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥२८

मदन परिहर स्थितिं मदीये मनसि मुकुंदपदारविंदधाम्नि ।
हरनयनकृशानुना कृशोऽसि स्मरसि न चक्रपराक्रमं मुरारेः॥२९
तत्त्वं ब्रुवाणानि परं परस्मान्मधु क्षरंतीव सतां फलानि ।
प्रावर्तय प्रांजलिरस्मि जिह्वे नामानि नारायणगोचराणि ॥३०

इदं शरीरं परिणामपेशलं पतत्यवश्यं श्लथसंधिजर्जरम् ।
किमौषधैः क्लिश्यसि मूढ दुर्मते निरामयं कृष्णरसायनं पिब ॥३१

दारा वाराकरवरसुता ते तनूजो विरिंचिः
स्तोता वेदास्तव सुरगणो भृत्यवर्गः प्रसादः ।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं वलरिपुसुतस्त्वय्यतोऽन्यन्न जाने ॥३२

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति विश्वमेतदखिलं हे कृष्ण रक्षस्व माम् ॥३३

स त्वं प्रसीद भगवन्कुरु मय्यनाथे
विष्णो कृपा परमकारुणिकः किल त्वम् ।
संसारसागरनिमग्नमनंतदीन-
मुद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि ॥३४

नमामि नारायणपादपंकजं करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं स्मरामि नारायणतत्त्वमव्ययम् ॥३५

श्रीनाथ नारायण वासुदेव श्रीकृष्ण भक्तप्रियचक्रपाणे ।
श्रीपद्मनाभाच्युत कैटभारे श्रीराम पद्माक्ष हरे मुरारे ॥३६

अनंत वैकुंठ मुकुंद कृष्ण गोविंद दामोदर माधवेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चिदहो जनानां व्यसनाभिमुख्यम् ॥३७

ध्यायंति ये विष्णुमनंतमव्ययं हृत्पद्ममध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभयप्रदं ते यांति सिद्धिं परमां च वैष्णवीम् ॥३८

क्षीरसागरतरंगशीकरासारतारकितचारुमूर्तये ।
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥३९

यस्य प्रियौ श्रुतधरौ कविलोकवीरौ
मित्रे द्विजन्मवरपद्मशरावभूताम् ।
तेनांबुजाक्षचरणांबुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥४०

अच्युताष्टकम्

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचंद्रं भजे ॥१
अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् ।
इंदिरामंदिरं चेतसा सुंदरं देवकीनंदनं नंदजं संदधे ॥२
विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जानकीजानये ।
वल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥३
कृष्ण गोविंद हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानंत हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४
राक्षसक्षोभितः सीतया शोभितो दंडकारण्यभूपुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥
धेनुकारिष्टकानिष्टकृद्द्वेषिहा केशिहा कंसहृद्वंशिकावादकः ।
पूतनाकोपकः सूरजाखेलनो वालगोपालकः पातु मां सर्वदा ॥६
विद्युदुद्योतवत्प्रस्फुरद्वाससं प्रावृडंभोदवत्प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्षं भजे॥७
कुंचितैः कुंतलैर्भ्राजमानाननं रत्नमौलिं लसत्कुंडलं गंडयोः ।
हारकेयूरकं कंकणप्रोज्ज्वलं किंकिणीमंजुलं श्यामलं तं भजे ॥८
अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुंदरं कर्तृविश्वंभरस्तस्य वश्यो हरिर्जायते सत्वरम् ॥९

दशावतारस्तोत्रम्

प्रलयपयोधिजले धृतवानसि वेदं
विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर जय जगदीश हरे ॥१

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप जय जगदीश हरे ॥२

वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलंककलेव निमग्ना ।
केशव धृतसूकररूप जय जगदीश हरे ॥३

तव करकमलवरे नखमद्भुतशृंगं
दलितहिरण्यकशिपुतनुभृंगम् ।
केशव धृतनरहरिरूप जय जगदीश हरे ॥४

छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप जय जगदीश हरे ॥५

क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि पयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप जय जगदीश हरे ॥६

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिवलिं रमणीयम् ।
केशव धृतरघुपतिरूप जय जगदीश हरे ॥७

वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधरस्वरूप जय जगदीश हरे ॥८
निंदसि यज्ञविधेरहह श्रुतिजातं
सदयहृदयदर्शितपशुघातम् ।
केशव धृतबुद्धशरीर जय जगदीश हरे ॥९
म्लेच्छनिवहनिधने कलयसि करवालं
धूमकेतुमिव किमपि करालं ।
केशव धृतकल्किशरीर जय जगदीश हरे ॥१०
श्रीजयदेवकवेरिदमुदितमुदारं
शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप जय जगदीश हरे ॥११
वेदानुद्धरते जगंति वहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

सूर्यध्यानम्

रक्तांबुजासनमशेषगुणैकसिंधुं
भानुं समस्तजगतामधिपं भजामि ।
पद्मद्वयाभयवरान् दधतं कराब्जै-
र्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रम् ॥

सूर्यप्रणामः

जवाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।
ध्वांतारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥

सूर्याष्टकम्

सांब उवाच

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥१
सप्ताश्वरथमारूढं प्रचंडं कश्यपात्मजम् ।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥२
लोहितं रथमारूढं सर्वलोकपितामहम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३
त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥४
बृंहितं तेजःपुंजं च वायुमाकाशमेव च ।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५
बंधूकपुष्पसंकाशं हारकुंडलभूषितम् ।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥६

तं सूर्यं जगत्कर्तारं महातेजःप्रदीपनम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥७
तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥८

सूर्यकवचस्तोत्रम्

याज्ञवल्क्य उवाच

शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥१
देदीप्यमानमुकुटं स्फुरन्मकरकुंडलम् ।
ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥२
शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ।
नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥३
घ्राणं घर्मघृणिः पातु वदनं वेदवाहनः ।
जिह्वा मे मानदः पातु कंठं मे सुरवंदितः ॥४
स्कंधौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वांगं सकलेश्वरः ॥५
सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥६
सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ।
स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विंदति ॥७

देवीध्यानम्

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेंदुरेखां
शंखं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्राम् ।
सिंहस्कंधाधिरूढां त्रिभुवनमखिलं तेजसा पूरयंतीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

देवीप्रणामः

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥

देवीसूक्तम्

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥१

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥२

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीम् ॥३

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमंतवो मां त उपक्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥६

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वंतः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥७

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥८

ब्रह्माकृतदेवीस्तुतिः

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥१

अर्धमात्रा स्थिता नित्या यानुच्चार्याविशेषतः ।
त्वमेव सा त्वं सावित्री त्वं देवजननी परा ॥२

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवी त्वमत्स्यंते च सर्वदा ॥३

विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपांते जगतोऽस्य जगन्मये ॥४

महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ॥५

प्रकृतिस्त्वं हि सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥६

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च॥७

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शंखिनी चापिनी वाणभुशुंडीपरिघायुधा ॥८
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥९
यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥१०
यया त्वया जगत्स्रष्टा जत्पातात्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥११
विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥१२
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१३
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
वोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥१४

शक्रादिकृतदेवीस्तुतिः

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन् दुरात्मनि सुरारिवले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥१
देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ।
तामंविकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥२

यस्याः प्रभावमतुलं भगवाननंतो
ब्रह्मा हरश्च न हि वक्तुमलं वलं च ।
सा चंडिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥३

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥४

किं वर्णयाम तव रूपमचिंत्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाति यानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥५

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥६

यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥७

या मुक्तिहेतुरविचिंत्यमहाव्रता च
अभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥८

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहंत्री ॥९

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसंगा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥१०

ईषत्सहासममलं परिपूर्णचंद्र-
बिंबानुकारिकनकोत्तमकांतिकांतम् ।
अत्यद्भुतं प्रहृतमाप्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥११

दृष्ट्वा तु देवि कुपितं भृकुटीकराल-
मुद्यच्छशांकसदृशच्छवि यन्न सद्यः ।
प्राणान् मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितांतकदर्शनेन ॥१२

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेतं
नीतं बलं सुविपुलं महिषासुरस्य ॥१३

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१५

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥१६

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१७

दृष्ट्वैव किन्न भवति प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी॥१८

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥१९

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२०

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२१
त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥२२
शूलेन पाहि नो देवि पाहि खड्गेन चांबिके ।
घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२३
प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य चोत्तरस्यां तथेश्वरि ॥२४
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् ॥२५
खड्गशूलगदादीनि यानि चास्त्राणि तेंऽबिके ।
करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः ॥२६

देवगणकृतापराजितास्तुतिः

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥१
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥२
कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०
या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३
या देवी सर्वभूतेषु क्षांतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४
या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६

या देवी सर्वभूतेषु शांतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८

या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तयै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५

या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६

इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥२७

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८

इंद्रादिकृतनारायणीस्तुतिः

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥१

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ॥२

त्वं वैष्णवीशक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया ।
संमोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥३

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमंबयैतत् का ते स्तुतिः स्तव्यपराऽपरोक्तिः ॥४

सर्वभूता यदा देवी भुक्तिमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ॥५

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥६

कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥७

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥८

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥९

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥१०

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणी ।
कौशांभःक्षरिके देवि नारायणि नमोऽस्तु ते ॥११

त्रिशूलचंद्राहिधरे महावृषभवाहिनी ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥१२

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥१३

शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥१४

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१५

नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥१६

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैंद्रि नारायणि नमोऽस्तु ते ॥१७

शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥१८

द्रंष्ट्राकरालवदने शिरोमालाहिभूषणे ।
चामुंडे मुंडमथने नारायणि नमोऽस्तु ते ॥१९

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।
महारात्रि महामाये नारायणि नमोऽस्तु ते ॥२०

मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥२१

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२२
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते ॥२३
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥२४
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव॥२५
असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चंडिके त्वां नता वयम्॥२६
रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥२७
एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वांबिके तत्प्रकरोति कान्या ॥२८
विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽतिमहांधकारे विभ्रामयत्येतदतीव विश्वम् ॥२९
रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम्॥३०
विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३१
देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान्
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३३

दुर्गास्तवराजः

नमस्ते शरण्ये शिवे सानुकंपे
नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वंद्यपादारविंदे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१
नमस्ते जगच्चिंत्यमानस्वरूपे
नमस्ते महायोगिनि ज्ञानरूपे ।
नमस्ते सदानंदनंदस्वरूपे
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥२
अनाथस्य दीनस्य तृष्णातुरस्य
क्षुधार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३
अरण्ये रणे दारुणे शत्रुमध्ये-
ऽनले सागरे प्रांतरे राजगेहे ।
त्वमेका गतिर्देवि निस्तारहेतु-
र्नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४
अपारे महादुस्तरेऽत्यंतघोरे
विपत्सागरे मज्जतां देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारनौका
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५
नमश्चंडिके चंडदोर्दंडलीला-
समुत्खंडिताखंडलाशेषभीते ।
त्वमेका गतिर्विघ्नसंदोहहंत्री
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६

त्वमेकाजिताराधितासत्यवादि-
न्यमेयाजिताक्रोधना क्रोधनिष्ठा ।
इडा पिंगला त्वं सुषुम्ना च नाडी
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥७
नमो देवि दुर्गे शिवे भीमनादे
सरस्वत्यरुंधत्यमोघस्वरूपे ।
विभूतिः शची कालरात्रिः सती त्वं
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८
शरणमसि सुराणां सिद्धविद्याधराणां
मुनिदनुजनराणां व्याधिभिः पीडितानां।
नृपतिगृहगतानां दस्युभिरावृतानां
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥९
इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ।
त्रिसंध्यमेकसंध्यं वा पठनादेव संकटात् ॥१०
मुच्यते नात्र संदेहो भुवि स्वर्गे रसातले ।
समस्तश्लोकमेकं वा यः पठेद् भक्तितः सदा॥११
स सर्वदुष्कृतिं तीर्त्वा प्राप्नोति परमां गतिम् ।
पठनादस्य देवेशि किं न सिध्यति भूतले ॥१२

भवान्यष्टकम्

न तातो न माता न बंधुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥१

भवाब्धावपारे महादुःखभीरुः
प्रपन्नः प्रकामी प्रलोभी प्रमत्तः।
कुसंसारपाशप्रबद्धः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥२

न जानामि दानं न च ध्यानयोगं
न जानामि तंत्रं न च स्तोत्रमंत्रम्।
न जानामि पूजां न च न्यासयोगं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥३

न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्ति लयं वा कदाचित्।
न जानामि भक्ति व्रतं वाऽपि मातं-
र्गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥४

कुकर्मी कुसंगी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः।
कुदृष्टिः कुवाक्यप्रबंधः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥५

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित्।
न जानामि चान्यं सुराणां शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥६

विवादे विषादे प्रमादे प्रवासे
जले वाऽनले पर्वते शत्रुमध्ये।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥७

अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टः सदाऽहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ॥८

देव्यपराधक्षमापनस्तोत्रम्

न मंत्रं नो यंत्रं तदपि च न जाने नुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१

विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षंतव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२

पृथिव्यां पुत्रास्ते जननि बहवः संति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४

परित्यक्ता देवा विविधविधिसेवाकुलतया
मया पंचाशीतेरधिकमपनीते तु वयसि ।
इदानीं मे मातस्तव यदि कृपा नापि भविता
निरालंबो लंबोदरजननि कं यामि शरणम् ॥५

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातंको रंको विहरति चिरं कोटिकनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कंठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७

न मोक्षस्याकांक्षा न च विभववांछापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिवशिवभवानीति जपतः ॥८

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिंतनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किंचन मय्यनाथे
धत्से कृपामुचितमंब परं तवैव ॥९

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरंति ॥१०

जगदंब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरंपरावृतं न हि माता समुपेक्षते सुतम् ॥११

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२

कालिकाध्यानम्

मेघांगीं विगतांवरां शवशिवारूढां त्रिनेत्रां परां
कर्णालंविनृमुंडयुग्मभयदां मुंडस्रजां भीषणाम् ।
वामाधोर्ध्वकरांबुजे नरशिरः खड्गं च सव्येतरे
दानाभीति विमुक्तकेशनिचयां वंदे सदा कालिकाम्॥

कालिकाप्रणामः

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥

कालिकास्तोत्रम्

त्वं परा प्रकृतिः साक्षाद्ब्रह्मणः परमात्मनः ।
त्वत्तो जातं जगत्सर्वं त्वं जगज्जननी शिवे ॥१

महदाद्यणुपर्यंतं यदेतत्सचराचरम् ।
त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत् ॥२

त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः ।
त्वं जानासि जगत्सर्वं न त्वां जानाति कश्चन ॥३

त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी ।
धूमावती त्वं वगला भैरवी छिन्नमस्तका ॥४

त्वमन्नपूर्णा वाग्देवी त्वं देवि कमलालया ।
सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनुः ॥५

त्वमेब सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी ।
निराकारापि साकारा कस्त्वां वेदितुमर्हति ॥६

उपासकानां कार्यार्थं श्रेयसे जगतामपि ।
दानवानां विनाशाय धत्से नानाविधास्तनूः ॥७
चतुर्भुजा त्वं द्विभुजा षड्भुजाष्टभुजा तथा ।
त्वमेव विश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी ॥८
त्वं सर्वरूपिणी देवी सर्वेषां जननी परा ।
तुष्टायां त्वयि देवेशि सर्वेषां तोषणं भवेत् ॥९
सृष्टेरादौ त्वमेकासीत्तमोरूपमगोचरम् ।
त्वत्तो जातं जगत्सर्वं परब्रह्मसिसृक्षया ॥१०
महत्तत्त्वादिभूतांतं त्वया सृष्टमिदं जगत् ।
निमित्तमात्रं तद्ब्रह्म सर्वकारणकारणम् ॥११
सद्रूपं सर्वतोव्यापि सर्वमावृत्य तिष्ठति ।
सदैकरूपं चिन्मात्रं निर्लिप्तं सर्ववस्तुषु ॥१२
न करोति न चाश्नाति न गच्छति न तिष्ठति ।
सत्यं ज्ञानमनाद्यंतमवाङ्मनसगोचरम् ॥१३
तस्येच्छामात्रमालंब्य त्वं महायोगिनी परा ।
करोषि पासि हंस्यंते जगदेतच्चराचरम् ॥१४
तव रूपं महाकालो जगत्संहारकारकः ।
महासंहारसमये कालः सर्वं ग्रसिष्यति ॥१५
कलनात्सर्वभूतानां महाकालः प्रकीर्तितः ।
महाकालस्य कलनात्त्वमाद्या कालिका परा ॥१६
कालसंग्रसनात्काली सर्वेषामादिरूपिणी ।
कालत्वादादिभूतत्वादाद्या कालीति गीयते ॥१७
पुनः स्वरूपमासाद्य तमोरूपं निराकृति ।
वाचातीतं मनोऽगम्यं त्वमेकैवावशिष्यसे ॥१८
साकारापि निराकारा मायया बहुरूपिणी ।
त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका ॥१९

जगद्धात्रीस्तोत्रम्

आधारभूते चाधेये धृतिरूपे धुरंधरे ।
ध्रुवे ध्रुवपदे धीरे जगद्धात्रि नमोऽस्तु ते ॥१
शवाकारे शक्तिरूपे शक्तिस्थे शक्तिविग्रहे ।
शाक्ताचारप्रिये देवि जगद्धात्रि नमोऽस्तु ते॥२
जयदे जगदानंदे जगदेकप्रपूजिते ।
जय सर्वगते दुर्गे जगद्धात्रि नमोऽस्तु ते ॥३
परमाणुस्वरूपे च द्वयणुकादिस्वरूपिणि ।
सूक्ष्मातिसूक्ष्मरूपे च जगद्धात्रि नमोऽस्तु ते॥४
सूक्ष्मातिसूक्ष्मरूपे च प्राणापानादिरूपिणि ।
भावाभावस्वरूपे च जगद्धात्रि नमोऽस्तु ते ॥५
कालादिरूपे कालेशे कालाकालविभेदिनि ।
सर्वस्वरूपे सर्वज्ञे जगद्धात्रि नमोऽस्तु ते ॥६
महाविघ्ने महोत्साहे महामाये वरप्रदे ।
प्रपंचसारे साध्वीशे जगद्धात्रि नमोऽस्तु ते ॥७
अगम्ये जगतामाद्ये माहेश्वरि वरांगने ।
अशेषरूपे रूपस्थे जगद्धात्रि नमोऽस्तु ते ॥८
द्विसप्तकोटिमंत्राणां शक्तिरूपे सनातनि ।
सर्वशक्तिस्वरूपे च जगद्धात्रि नमोऽस्तु ते ॥९
तीर्थयज्ञतपोदानयोगसारे जगन्मयि ।
त्वमेव सर्वं सर्वस्थे जगद्धात्रि नमोऽस्तु ते ॥१०
दयारूपे दयादृष्टे दयार्द्रे दुःखमोचनि ।
सर्वापत्तारिके दुर्गे जगद्धात्रि नमोऽस्तु ते ॥११
अगम्यधामधामस्थे महायोगीशहृत्पुरे ।
अमेयभावकूटस्थे जगद्धात्रि नमोऽस्तु ते ॥१२

अन्नपूर्णास्तोत्रम्

नित्यानंदकरी वराभयकरी सौंदर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥१

नानारत्नविचित्रभूषणकरी हेमांवराडंवरी
मुक्ताहारविलंबमानविलसद्वक्षोजकुंभांतरी ।
काश्मीरागुरुवासिता रुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥२

योगानंदकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी
चंद्रार्कानिलभासमानलहरी त्रैलोक्यरक्षाकरी ।
सर्वैश्वर्यसमस्तवांछितकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥३

कैलासाचलकंदरालयकरी गौरी उमा शंकरी
कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी ।
मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥४

दृश्यादृश्यप्रभूतपावनकरी ब्रह्मांडभांडोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपांकुरी ।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥५

उर्वीसर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी
वेणीनीलसमानकुंतलहरी नित्यान्नदानेश्वरी ।
सर्वानंदकरी दशाशुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥६

आदिक्षांतसमस्तवर्णनकरी शंभोस्त्रिभावाकरी
काश्मीरा त्रिजनेश्वरी त्रिलहरी नित्यांकुराशर्वरी ।
कामाकांक्षकरी जनोदयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥७

दर्वी स्वर्णविचित्ररत्नखचिता दक्षे करे संस्थिता
वामे स्वादुपयोधरी सहचरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी दृशा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥८

चंद्रार्कानलकोटिकोटिसदृशा चंद्रांशुविंवाधरी
चंद्रार्काग्निसमानकुंडलधरी चंद्रार्कवर्णेश्वरी ।
मालापुस्तकपाशकांकुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥९

क्षत्रत्राणकरी महाभयकरी माता कृपासागरी
साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी ।
दक्षाक्रंदकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंवनकरी मातान्नपूर्णेश्वरी ॥१०

अन्नपूर्णे सदापूर्णे शंकरप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ॥११

माता मे पार्वती देवी पिता देवो महेश्वरः ।
वांधवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥१२

अंबास्तोत्रम्

का त्वं शुभे शिवकरे सुखदुःखहस्ते
आघूर्णितं भवजलं प्रबलोर्मिभंगैः ।
शांतिं विधातुमिह किं बहुधा विभग्नां
मातः प्रयत्नपरमासि सदैव विश्वे ॥१
संपादयंत्यविरतं त्वविरामवृत्ता
या वै स्थिता कृतफलं त्वकृतस्य नेत्री ।
सा मे भवत्वनुदिनं वरदा भवानि
जानाम्यहं ध्रुवमियं धृतकर्मपाशा ॥२
किं वा कृतं किमकृतं क्व कपाललेखः
किं कर्म वा फलमिहास्ति हि यां विना भोः ।
इच्छागुणैर्नियमिता नियमाः स्वतंत्रै-
र्यस्याः सदा भवतु सा शरणं ममाद्या ॥३
संतानयंति जलधिं जनिमृत्युजालं
संभावयंत्यविकृतं विकृतं विभग्नम् ।
यस्या विभूतय इहामितशक्तिपालाः
नाश्रित्य तां वद कुतः शरणं व्रजामः ॥४
मित्रे रिपौ त्वविषमं तव पद्मनेत्रं
स्वस्थेऽसुखे त्ववितथस्तव हस्तपातः ।
छाया मृतेस्तव दया त्वमृतं च मातः
मुंचंतु मां न परमे शुभदृष्टयस्ते ॥५
कांवा शिवा क्व गृणनं मम हीनबुद्धेः
दोर्भ्यां विधर्तुमिव यामि जगद्विधात्रीम् ।
चिंत्यं श्रिया सुचरणं त्वभयप्रतिष्ठं
सेवापरैरभिनुतं शरणं प्रपद्ये ॥६

या मां चिराय विनयत्यतिदुःखमार्गै-
रासिद्धितः स्वकलितैर्ललितैर्विलासैः ।
या मे मतिं सुविदधे सततं धरण्यां
सांबा शिवा मम गतिः सफलेऽफले वा ॥७

भगवतीस्तुतिः

प्रातः स्मरामि शरदिंदुकरोज्ज्वलाभां
सद्रत्नवन्मकरकुंडलहारभूषाम् ।
दिव्यायुधोर्जितसुनीलसहस्रहस्तां
रक्तोत्पलाभचरणां भवतीं परेशाम् ॥१

प्रातर्नमामि महिषासुरचंडमुंड-
शुंभासुरप्रमुखदैत्यविनाशदक्षाम् ।
ब्रह्मेंद्ररुद्रमुनिमोहनशीललीलां
चंडीं समस्तसुरमूर्तिमनेकरूपाम् ॥२

प्रातर्भजामि भजतामभिलाषदात्रीं
धात्रीं समस्तजगतां दुरितापहंत्रीम् ।
संसारबंधनविमोचनहेतुभूतां
मायां परां समधिगम्य परस्य विष्णोः ॥३

श्लोकत्रयमिदं देव्याश्चंडिकायाः पठेन्नरः ।
सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥४

लक्ष्मीध्यानम्

पाशाक्षमालिकांभोजशृणिभिर्याम्यसौम्ययोः ।
पद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपां च सर्वालंकारभूषिताम् ।
रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु ॥

लक्ष्मीप्रणामः

विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे ।
सर्वतः पाहि मां देवि महालक्ष्मि नमोऽस्तु ते ॥

श्रीसूक्तम्

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विदेयं गामश्वं पुरुषानहम् ॥२
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥३
कां सोस्मितां हिरण्यप्राकारमार्द्रां ज्वलंतीं तृप्तां तर्पयंतीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४
चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५
आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ विल्वः ।
तस्य फलानि तपसा नुदंतु मायांतरायाश्च बाह्या अलक्ष्मीः ॥६

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८
गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०
कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११
आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२
आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विदेयं पुरुषानहम्॥१५

महालक्ष्म्यष्टकम्

इंद्र उवाच

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१
नमस्ते गरुडारूढे कोलासुरभयंकरि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥२

सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥३
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मंत्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥४
आद्यंतरहिते देवि आद्यशक्तिमहेश्वरि ।
योगजे योगसंभूते महालक्ष्मि नमोऽस्तु ते ॥५
स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥६
पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥७
श्वेतांबरधरे देवि नानालंकारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥८
महालक्ष्म्यष्टकस्तोत्रं यः पठेद् भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥९
एककाले पठेन्नित्यं महापापविनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥१०
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११

सरस्वतीध्यानम्

(१)

तरुणशकलमिंदोर्बिभ्रती शुभ्रकांतिः
कुचभरनमितांगी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता नः ॥

(२)

वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुंदप्रभां
चंद्रार्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात् ।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥

सरस्वतीप्रणामः

भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदांगवेदांतविद्यास्थानेभ्य एव च ॥१
जय जय देवि चराचरसारे कुचयुगशोभितमुक्ताहारे ।
वीणापुस्तकरंजितहस्ते भगवति भारति देवि नमस्ते ॥२

मेधासूक्तम्

मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना ।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥
त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया ।
त्वया जुष्टश्चित्रं विंदते वसु सा नो जुषस्व द्रविणो न मेधे ॥
मेधां म इंद्रो दधातु मेधां देवी सरस्वती ।
मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा ॥

अप्सरासु च या मेधा गंधर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा ॥
आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषंताम् ॥

सरस्वतीरहस्यस्तोत्रम्

नीहारहारघनसारसुधाकराभां
कल्याणदां कनकचंपकदामभूषाम् ।
उत्तुंगपीनकुचकुंभमनोहरांगीं
वाणीं नमामि मनसा वचसा विभूत्यै ॥१
या वेदांतार्थतत्त्वैकस्वरूपा परमेश्वरी ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ॥२
या सांगोपांगवेदेषु चतुर्ष्वेकैव गीयते ।
अद्वैता ब्रह्मणः शक्तिः सा मां पातु सरस्वती ॥३
या वर्णपदवाक्यार्थस्वरूपेणैव वर्तते ।
अनादिनिधनानंता सा मां पातु सरस्वती ॥४
अध्यात्ममधिदैवं च देवानां सम्यगीश्वरी ।
प्रत्यगास्ते वदंती या सा मां पातु सरस्वती ॥५
अंतर्याम्यात्मना विश्वं त्रैलोक्यं या नियच्छति ।
रुद्रादित्यादिरूपस्था सा मां पातु सरस्वती ॥६
या प्रत्यग्दृष्टिभिर्जीवैर्व्यंजमानानुभूयते ।
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ॥७
नामजात्यादिभिर्भेदैरष्टधा या विकल्पिता ।
निर्विकल्पात्मना व्यक्ता सा मां पातु सरस्वती॥८

व्यक्ताव्यक्तगिरः सर्वे वेदाद्या व्याहरंति याम् ।
सर्वकामदुघा धेनुः सा मां पातु सरस्वती ॥९
यां विदित्वाखिलं बंधं निर्मथ्याखिलवर्त्मना ।
योगी याति परं स्थानं सा मां पातु सरस्वती ॥१०
नामरूपात्मकं सर्वं यस्यामावेश्य तां पुनः ।
ध्यायंति ब्रह्मरूपैका सा मां पातु सरस्वती ॥११
चतुर्मुखमुखांभोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥१२
नमस्ते शारदे देवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ॥१३
अक्षसूत्रांकुशधरा पाशपुस्तकधारिणी ।
मुक्ताहारसमायुक्ता वाचि तिष्ठतु मे सदा ॥१४
कंबुकंठी सुताम्रोष्ठी सर्वाभरणभूषिता ।
महासरस्वती देवी जिह्वाग्रे संनिवेश्यताम् ॥१५
या श्रद्धा धारणा मेधा वाग्देवी विधिवल्लभा ।
भक्तजिह्वाग्रसदना शमादिगुणदायिनी ॥१६
नमामि यामिनीनाथलेखालंकृतकुंतलाम् ।
भवानीं भवसंतापनिर्वापणसुधानदीम् ॥१७
यः कवित्वं निरातंकं भुक्तिमुक्ती च वांछति ।
सोऽभ्यर्च्यैनां दशश्लोक्या नित्यं स्तौति सरस्वतीम् ॥१८
तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीम् ।
भक्तिश्रद्धाभियुक्तस्य षाण्मासात्प्रत्ययो भवेत् ॥१९
ततः प्रवर्तते वाणी स्वेच्छया ललिताक्षरा ।
गद्यपद्यात्मकैः शब्दैरप्रमेयैर्विवक्षितैः ॥
अश्रुतो बुध्यते ग्रंथः प्रायः सारस्वतः कविः ॥२०

सरस्वतीस्तोत्रम्

श्वेतपद्मासना देवी श्वेतपुष्पोपशोभिता ।
श्वेतांबरधरा नित्या श्वेतगंधानुलेपना ॥१
श्वेताक्षसूत्रहस्ता च श्वेतचंदनचर्चिता ।
श्वेतवीणाधरा शुभ्रा श्वेतालंकारभूषिता ॥२
वंदिता सिद्धगंधर्वैरर्चिता सुरदानवैः ।
पूजिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ॥३
स्तोत्रेणानेन तां देवीं जगद्धात्रीं सरस्वतीम् ।
ये स्मरंति त्रिसंध्यायां सर्वां विद्यां लभंते ते ॥४

ब्रह्मकृतसरस्वतीस्तोत्रम्

ॐ अस्य श्रीसरस्वतीस्तोत्रमंत्रस्य ब्रह्मा ऋषिः, गायत्रीच्छंदः, श्रीसरस्वती देवता, धर्मार्थकाममोक्षार्थे विनियोगः ।

आरूढा श्वेतहंसे भ्रमति च गगने दक्षिणे चाक्षसूत्रं
वामे हस्ते च दिव्यांबरकनकमयं पुस्तकं ज्ञानगम्या ।
सा वीणां वादयंती स्वकरकरजपैः शास्त्रविज्ञानशब्दैः
क्रीडंती दिव्यरूपा करकमलधरा भारती सुप्रसन्ना ॥१
श्वेतपद्मासना देवी श्वेतगंधानुलेपना ।
अर्चिता मुनिभिः सर्वैर्ऋषिभिः स्तूयते सदा ।
एवं ध्यात्वा सदा देवीं वांछितं लभते नरः ॥२
शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यांधकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वंदे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥३

या कुंदेंदुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदंडमंडितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वंदिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥४

ह्रीं ह्रीं हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे
भव्ये भव्यानुकूले कुमतिवनदवे विश्ववंद्यांघ्रिपद्मे ।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसंपादयित्रि
प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे ॥५

ऐं ऐं ऐं इष्टमंत्रे कमलभवमुखांभोजभूतिस्वरूपे
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ।
न स्थूले नैव सूक्ष्मेऽप्यविदितविषये नापि विज्ञाततत्त्वे
विश्वे विश्वांतरात्मे सुरवरनमिते निष्कले नित्यशुद्धे ॥६

ह्रीं ह्रीं ह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते
मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्ताम् ।
विद्ये वेदांतवेद्ये परिणतपठिते मोक्षदे मुक्तिमार्गे
मार्गातीतप्रभावे भव मम वरदा शारदे शुभ्रहारे ॥७

धीर्धीर्धीर्धारणाख्ये धृतिमतिनतिभिर्नामभिः कीर्तनीये
नित्येऽनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे ।
पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे
मातर्मात्रार्धतत्त्वे मतिमतिमतिदे माधवप्रीतिमोदे ॥८

ह्रूं ह्रूं ह्रूं स्वस्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते
संतुष्टाकारचित्ते स्मितमुखि सुभगे जृंभिणि स्तंभविद्ये ।
मोहे मुग्धप्रभावे कुरु मम कुमतिध्वांतविध्वंसमीड्ये
गीर्गौर्वाग्भारती त्वं कविवररसनासिद्धिदे सिद्धिसाध्ये ॥९

स्तौमि त्वां त्वां च वंदे मम खलु रसनां मा कदाचित्त्यजेथा
मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम् ।
मा मे दुःखं कदाचित्क्वचिदपि विषयेऽप्यस्तु मे नाकुलत्वं
शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुंठा कदापि ॥१०

इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो
वाणी वाचस्पतेरप्यविदितविभवो वाक्पटुर्मुष्टकंठः ।
स स्यादिष्टार्थलाभैः सुतमिव सततं पाति तं सा च देवी
सौभाग्यं तस्य लोके प्रभवति कविता विघ्नमस्तं प्रयाति॥११

निर्विघ्नं तस्य विद्या प्रभवति सततं चाश्रुतग्रंथबोधः
कीर्तिस्त्रैलोक्यमध्ये निवसति वदने शारदा तस्य साक्षात् ।
दीर्घायुर्लोकपूज्यः सकलगुणनिधिः संततं राजमान्यो
वाग्देव्याः संप्रसादात्त्रिजगति विजयी जायते सत्सभासु ॥१२

ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ।
सारस्वतो जनः पाठात्सकृदिष्टार्थलाभवान् ॥१३
पक्षद्वये त्रयोदश्यामेकविंशतिसंख्यया ।
अविच्छिन्नः पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम्॥१४
सर्वपापविनिर्मुक्तः सुभगो लोकविश्रुतः ।
वांछितं फलमाप्नोति लोकेऽस्मिन्नात्र संशयः ॥१५
ब्रह्मणेति स्वयं प्रोक्तं सरस्वत्याः स्तवं शुभम् ।
प्रयत्नेन पठेन्नित्यं सोऽमृतत्वाय कल्पते ॥१६

गंगास्तोत्रम्

देवि सुरेश्वरि भगवति गंगे त्रिभुवनतारिणि तरलतरंगे ।
शंकरमौलिनिवासिनि विमले मम मतिरास्तां तव पदकमले ॥१
भागीरथि सुखदायिनि मातस्तव जलमहिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं त्राहि कृपामयि मामज्ञानम् ॥२
हरिपदपाद्यतरंगिणि गंगे हिमविधुमुक्ताधवलतरंगे ।
दूरीकुरु मम दुष्कृतिभारं कुरु कृपया भवसागरपारम् ॥३
तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।
मातर्गंगे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ॥४
पतितोद्धारिणि जाह्नवि गंगे खंडितगिरिवरमंडितभंगे ।
भीष्मजननि खलु मुनिवरकन्ये पतितनिवारिणि त्रिभुवनधन्ये ॥५
कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ।
पारावारविहारिणि गंगे विबुधवधूकृततरलापांगे ॥६
तव कृपया चेत्स्रोतःस्नातः पुनरपि जठरे सोऽपि न जातः ।
नरकनिवारिणि जाह्नवि गंगे कलुषविनाशिनि महिमोत्तुंगे ॥७
परिलसदंगे पुण्यतरंगे जय जय जाह्नवि करुणापांगे ।
इंद्रमुकुटमणिराजितचरणे सुखदे शुभदे सेवकचरणे ॥८
रोगं शोकं पापं तापं हर मे भगवति कुमतिकलापं ।
त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥९
अलकानंदे परमानंदे कुरु मयि करुणां कातरवंद्ये ।
तव तटनिकटे यस्य हि वासः खलु वैकुंठे तस्य निवासः ॥१०
वरमिह नीरे कमठो मीनः किंवा तीरे सरटः क्षीणः ।
अथ गव्यूतौ श्वपचो दीनो न पुनर्दूरे नृपतिकुलीनः ॥११

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गंगास्तवमिमममलं नित्यं पठति नरो यः स जयति सत्यम् ॥१२

येषां हृदये गंगाभक्तिस्तेषां भवति सदा सुखमुक्तिः ।
मधुरमनोहरपज्झटिकाभिः परमानंदकलितललिताभिः ॥१३

गंगास्तोत्रमिदं भवसारं वांछितफलदं विदितमुदारम् ।
शंकरसेवकशंकररचितं पठतु च विषयीदमिति समाप्तम् ॥१४

गंगामाहात्म्यम्

पवित्राणां पवित्रं या मंगलानां च मंगलम् ।
महेश्वरशिरोभ्रष्टा सर्वपापहरा शुभा ॥१
गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥२
स्नानात्पानाच्च जाह्नव्यां पितॄणां तर्पणात्तथा ।
महापातकवृंदानि क्षयं यांति दिने दिने ॥३
तपोभिर्बहुभिर्यज्ञैर्व्रतैर्नानाविधैस्तथा ।
पुरुदानैर्गतिर्या च गंगां संसेव्य तां लभेत् ॥४
पुनाति कीर्तिता पापं दृष्टा भद्रं प्रयच्छति ।
अवगाढा च पीता च पुनात्यासप्तमं कुलम् ॥५

रामचंद्रध्यानम्

कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यंतं मुकुटांगदादिविविधाकल्पोज्ज्वलांगं भजे ॥

रामचंद्रप्रणामः

रामाय रामचंद्राय रामभद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

रामरक्षास्तोत्रम्

अस्य श्रीरामरक्षास्तोत्रमंत्रस्य बुधकौशिक ऋषिः श्रीसीतारामचंद्रो देवता अनुष्टुप् छंदः सीता शक्तिः श्रीमान् हनुमान् कीलकं श्रीरामचंद्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ।

अथ ध्यानम्

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामांकारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालंकारदीप्तं दधतमुरुजटामंडलं रामचंद्रम् ॥

इति ध्यानम्

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥१
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमंडितम् ॥२

सासितूणधनुर्बाणपाणिं नक्तंचरांतकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥३
रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु भालं दशरथात्मजः ॥४
कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥५
जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः ।
स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥६
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः ॥७
सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥८
जानुनी सेतुकृत्पातु जंघे दशमुखांतकः ।
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥९
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥१०
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥११
रामेति रामभद्रेति रामचंद्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति ॥१२
जगज्जैत्रैकमंत्रेण रामनाम्नाभिरक्षितम् ।
यः कंठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥१३
वज्रपंजरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥१४
आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥१५

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥ १६

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।
पुंडरीकविशालाक्षौ चीरकृष्णाजिनांबरौ ॥१७

फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षःकुलनिहंतारौ त्रायेतां नो रघूत्तमौ ॥१९

आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥२०

सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः ॥२१

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥२२

वेदांतवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥२३

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः ।
अश्वमेधादिकं पुण्यं संप्राप्नोति न संशयः ॥२४

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवंति नामभिर्दिव्यैर्न ते संसारिणो नराः ॥२५

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुंदरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेंद्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिं
वंदे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६

रामाय रामभद्राय रामचंद्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥२७

श्रीराम राम रघुनंदन राम राम
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥२८

श्रीरामचंद्रचरणौ मनसा स्मरामि
श्रीरामचंद्रचरणौ वचसा गृणामि ।
श्रीरामचंद्रचरणौ शिरसा नमामि
श्रीरामचंद्रचरणौ शरणं प्रपद्ये ॥२९

माता रामो मत्पिता रामचंद्रः स्वामी रामो मत्सखा रामचंद्रः ।
सर्वस्वं मे रामचंद्रो दयालुर्नान्यं जाने नैव जाने न जाने ॥३०

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वंदे रघुनंदनम् ॥३१

लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तं श्रीरामचंद्रं शरणं प्रपद्ये ॥३२

मनोजवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥३३

कूजंतं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वंदे वाल्मीकिकोकिलम् ॥३४

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥३५

भर्जनं भवबीजानामर्जनं सुखसंपदाम् ।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥३६

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥३७
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥३८

ब्रह्मदेवकृतरामस्तुतिः

वंदे देवं विष्णुमशेषस्थितिहेतुं
त्वामध्यात्मज्ञानिभिरंतर्हृदि भाव्यम्।
हेयाहेयद्वंद्वविहीनं परमेकं
सत्तामात्रं सर्वहृदिस्थं दृशिरूपम् ॥१
प्राणापानौ निश्चयबुद्ध्या हृदि रुद्ध्वा
छित्त्वा सर्वं संशयबंधं विषयौघान् ।
पश्यंतीशं यं गतमोहा यतयस्तं
वंदे रामं रत्नकिरीटं रविभासम् ॥२
मायातीतं माधवमाद्यं जगदादिं
मानातीतं मोहविनाशं मुनिवंद्यम् ।
योगिध्येयं योगविधानं परिपूर्णं
वंदे रामं रंजितलोकं रमणीयम् ॥३
भावाभावप्रत्ययहीनं भवमुख्यै-
र्योगासक्तैरर्चितपादांबुजयुग्मम् ।
नित्यं शुद्धं बुद्धमनंतं प्रणवाख्यं
वंदे रामं वीरमशेषासुरदावम् ॥४

त्वं मे नाथो नाथितकार्याखिलकारी
मानातीतो माधवरूपोऽखिलधारी ।
भक्त्या गम्यो भावितरूपो भवहारी
योगाभ्यासैर्भावितचेतः सहचारी ॥५

त्वामाद्यंतं लोकततीनां परमीशं
लोकानां नो लौकिकमानैरधिगम्यम् ।
भक्तिश्रद्धाभावसमेतैर्भजनीयं
वंदे रामं सुंदरमिंदीवरनीलम् ॥६

को वा ज्ञातुं त्वामतिमानं गतमानं
मायासक्तो माधव शक्तो मुनिमान्यम् ।
वृंदारण्ये वंदितवृंदारकवृंदं
वंदे रामं भवमुखवंद्यं सुखकंदम् ॥७

नानाशास्त्रैर्वेदकदंबैः प्रतिपाद्यं
नित्यानंदं निर्विषयज्ञानमनादिम् ।
मत्सेवार्थं मानुषभावं प्रतिपन्नं
वंदे रामं मरकतवर्णं मथुरेशम् ॥८

श्रद्धायुक्तो यः पठतीमं स्तवमाद्यं
ब्राह्मं ब्रह्मज्ञाननिधानं भुवि मर्त्यः ।
रामं श्यामं कामितकामप्रदमीशं
ध्यात्वा ध्याता पातकजालैर्विगतः स्यात् ॥९

रामचंद्रस्तुतिः

नमामि भक्त वत्सलं कृपालु शील कोमलं ।
भजामि ते पदांबुजं अकामिनां स्वधामदं ॥१

निकाम श्याम सुंदरं भवांबुनाथ मंदरं।
प्रफुल्ल कंज लोचनं मदादि दोष मोचनं ॥२
प्रलंब बाहु विक्रमं प्रभोऽप्रमेय वैभवं।
निषंग चाप सायकं धरं त्रिलोक नायकं ॥३
दिनेश वंश मंडनं महेश चाप खंडनं।
मुनींद्र संत रंजनं सुरारि वृंद भंजनं ॥४
मनोज वैरि वंदितं अजादि देव सेवितं।
विशुद्ध बोध विग्रहं समस्त दूषणापहं ॥५
नमामि इंदिरा पतिं सुखाकरं सतां गतिं।
भजे सशक्ति सानुजं शची पति प्रियानुजं ॥६
त्वदंघ्रि मूल ये नराः भजंति हीन मत्सराः।
पतंति नो भवार्णवे वितर्क वीचि संकुले ॥७
विविक्त वासिनः सदा भजंति मुक्तये मुदा।
निरस्य इंद्रियादिकं प्रयांति ते गतिं स्वकं ॥८
तमेकमद्भुतं प्रभुं निरीहमीश्वरं विभुं।
जगद्गुरुं च शाश्वतं तुरीयमेव केवलं ॥९
भजामि भाव वल्लभं कुयोगिनां सुदुर्लभं।
स्वभक्त कल्प पादपं समं सुसेव्यमन्वहं ॥१०
अनूप रूप भूपतिं नतोऽहमुर्विजा पतिं।
प्रसीद मे नमामि ते पदाब्जभक्ति देहि मे ॥११
पठंति ये स्तवं इदं नरादरेण ते पदं।
व्रजंति नात्र संशयं त्वदीय भक्ति संयुताः ॥१२

कृष्णध्यानम्

सत्पुंडरीकनयनं मेघाभं वैद्युतांवरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥१
गोपगोपांगनावीतं सुरद्रुमतलाश्रितम् ।
दिव्यालंकरणोपेतं रत्नपंकजमध्यगम् ॥२
कालिंदीजलकल्लोलासंगिमारुतसेवितम् ।
चिंतयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः ॥३

कृष्णप्रणामः

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥

कृष्णस्तुतिः

कृषिर्भूवाचकः शब्दो नश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥१
सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदांतवेद्याय गुरवे बुद्धिसाक्षिणे ॥२
नमो विश्वस्वरूपाय विश्वस्थित्यंतहेतवे ।
विश्वेश्वराय विश्वाय गोविंदाय नमो नमः ॥३
नमो विज्ञानरूपाय परमानंदरूपिणे ।
कृष्णाय गोपीनाथाय गोविंदाय नमो नमः ॥४
नमः कमलनेत्राय नमः कमलमालिने ।
नमः कमलनाभाय कमलापतये नमः ॥५
बर्हापीडाभिरामाय रामायाकुंठमेधसे ।
रमामानसहंसाय गोविंदाय नमो नमः ॥६

कंसवंशविनाशाय केशिचाणूरघातिने ।
वृषभध्वजवंद्याय पार्थसारथये नमः ॥७
वेणुवादनशीलाय गोपालायाहिमर्दिने ।
कालिंदीकूललीलाय लोलकुंडलधारिणे ॥८
वल्लवीनयनांभोजमालिने नृत्यशालिने ।
नमः प्रणतपालाय श्रीकृष्णाय नमो नमः ॥९
नमः पापप्रणाशाय गोवर्धनधराय च ।
पूतनाजीवितांताय तृणावर्तासुहारिणे ॥१०
निष्कलाय विमोहाय शुद्धायाशुद्धवैरिणे ।
अद्वितीयाय महते श्रीकृष्णाय नमो नमः ॥११
प्रसीद परमानंद प्रसीद परमेश्वर ।
आधिव्याधिभुजंगेन दष्टं मामुद्धर प्रभो ॥१२
श्रीकृष्ण रुक्मिणीकांत गोपीजनमनोहर ।
संसारसागरे मग्नं मामुद्धर जगद्गुरो ॥१३
केशव क्लेशहरण नारायण जनार्दन ।
गोविंद परमानंद मां समुद्धर माधव ॥१४

कृष्णाष्टकम्–१

श्रियाश्लिष्टो विष्णुः स्थिरचरवपुर्वेदविषयो
धियां साक्षी शुद्धो हरिरसुरहंताब्जनयनः ।
गदी शंखी चक्री विमलवनमाली स्थिररुचिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥१
यतः सर्वं जातं वियदनिलमुख्यं जगदिदं
स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा ।
लये सर्वं स्वस्मिन् हरति कलया यस्तु स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥२

असूनायम्यादौ यमनियममुख्यैः सुकरणै-
निरुध्येदं चित्तं हृदि विलयमानीय सकलम् ।
यमीड्यं पश्यंति प्रवरमतयो मायिनमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥३॥

पृथिव्यां तिष्ठन् यो यमयति महीं वेद न धरा
यमित्यादौ वेदो वदति जगतामीशममलम् ।
नियंतारं ध्येयं मुनिसुरनृणां मोक्षदमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥४॥

महेंद्रादिर्देवो जयति दितिजान्यस्य वलतो
न कस्य स्वातंत्र्यं क्वचिदपि कुतो यत्कृतिमृते ।
कवित्वादेर्गर्वं परिहरति योऽसौ विजयिनः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥५॥

विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां
विना यस्य ज्ञानं जनिमृतिभयं याति जनता ।
विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥६॥

नरातंकोत्तंकः शरणशरणो भ्रांतिहरणो
घनश्यामः कामो व्रजशिशुवयस्योऽर्जुनसखः ।
स्वयंभूर्भूतानां जनक उचिताचारसुखदः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥७॥

यदा धर्मग्लानिर्भवति जगतां क्षोभकरणी
तदा लोकस्वामी प्रकटितवपुः सेतुधृगजः ।
सतां धाता स्वच्छो निगमगणगीतो व्रजपतिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥८॥

इति हरिरखिलात्माराधितः शंकरेण
श्रुतिविशदगुणोऽसौ मातृमोक्षार्थमाद्यः ।
यतिवरनिकटे श्रीयुक्त आविर्बभूव
स्वगुणवृत उदारः शंखचक्राब्जहस्तः ॥

कृष्णाष्टकम्–२

भजे व्रजैकमंडनं समस्तपापखंडनं
स्वभक्तचित्तरंजनं सदैव नंदनंदनम् ।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं
अनंगरंगसागरं नमामि कृष्णनागरम् ॥१

मनोजगर्वमोचनं विशाललोललोचनं
विधूतगोपशोचनं नमामि पद्मलोचनम् ।
करारविंदभूधरं स्मितावलोकसुंदरं
महेंद्रमानदारणं नमामि कृष्णवारणम् ॥२

कदंबसूनकुंडलं सुचारुगंडमंडलं
व्रजांगनैकवल्लभं नमामि कृष्णदुर्लभम् ।
यशोदया समोदया सगोपया सनंदया
युतं सुखैकदायकं नमामि गोपनायकम् ॥३

सदैव पादपंकजं मदीयमानसे निजं
दधानमुत्तमालकं नमामि नंदबालकम् ।
समस्तदोषशोषणं समस्तलोकपोषणं
समस्तगोपमानसं नमामि नंदलालसम् ॥४

भुवो भरावतारकं भवाब्धिकर्णधारकं
यशोमतीकिशोरकं नमामि चित्तचोरकम् ।
दृगंतकांतभंगिणं सदासदालसंगिनं
दिने दिने नवं नवं नमामि नंदसंभवम् ॥५
गुणाकरं सुखाकरं कृपाकरं कृपापरं
सुरद्विषन्निकंदनं नमामि गोपनंदनम् ।
नवीनगोपनागरं नवीनकेलिलंपटं
नमामि मेघसुंदरं तडित्प्रभालसत्पटम् ॥६
समस्तगोपनंदनं हृदंबुजैकमोदनं
नमामि कुंजमध्यगं प्रसन्नभानुशोभनम् ।
निकामकामदायकं दृगंतचारुसायकं
रसालवेणुगायकं नमामि कुंजनायकम् ॥७
विदग्धगोपिकामनोमनोज्ञतल्पशायिनं
नमामि कुंजकानने प्रवृद्धवह्निपायिनम् ।
यदा तदा यथा तथा तथैव कृष्णसत्कथा
मया सदैव गीयतां तथा कृपा विधीयताम् ॥
प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान्
भवेत्स नंदनंदने भवे भवे सुभक्तिमान् ॥८

मदनमोहनाष्टकम्

जय शंखगदाधर नीलकलेवर पीतपटांबर देहि पदम् ।
जय चंदनचर्चित कुंडलमंडित कौस्तुभशोभित देहि पदम् ॥१
जय पंकजलोचन मारविमोहन पापविखंडन देहि पदम् ।
जय वेणुनिनादक रासविहारक वंकिम सुंदर देहि पदम् ॥२

जय धीरधुरंधर अद्भुत सुंदर दैवतसेवित देहि पदम् ।
जय विश्वविमोहन मानसमोहन संस्थितिकारण देहि पदम् ॥ ३
जय भक्तजनाश्रय नित्यसुखालय अंतिमबांधव देहि पदम् ।
जय दुर्जयशासन केलिपरायण कालियमर्दन देहि पदम् ॥ ४
जय नित्यनिरामय दीनदयामय चिन्मय माधव देहि पदम् ।
जय पामरपावन धर्मपरायण दानवसूदन देहि पदम् ॥ ५
जय वेदविदां वर गोपवधूप्रिय वृंदावनधन देहि पदम् ।
जय सत्यसनातन दुर्गतिभंजन सज्जनरंजन देहि पदम् ॥ ६
जय सेवकवत्सल करुणासागर वांछितपूरक देहि पदम् ।
जय पूतधरातल देवपरात्पर सत्त्वगुणाकर देहि पदम् ॥ ७
जय गोकुलभूषण कंसनिषूदन सात्वतजीवन देहि पदम् ।
जय योगपरायण संसृतिवारण ब्रह्मनिरंजन देहि पदम् ॥ ८

कृष्णवंदना

नवीनमेघसंनिभं सुनीलकमलच्छविम् ।
सुहासरंजिताधरं नमामि कृष्णसुंदरम् ॥१
यशोदानंदनंदनं सुरेंद्रपादवंदनम् ।
सुवर्णरत्नमंडनं नमामि कृष्णसुंदरम् ॥२
भवाब्धिकर्णधारकं भयार्तिनाशकारकम् ।
मुमुक्षुमुक्तिदायकं नमामि कृष्णसुंदरम् ॥३

रामकृष्णध्यानम्

हृदयकमलमध्ये राजितं निर्विकल्पं
सदसदखिलभेदातीतमेकस्वरूपम् ।
प्रकृतिविकृतिशून्यं नित्यमानंदमूर्ति
विमलपरमहंसं रामकृष्णं भजामः ॥ १
निरुपममतिसूक्ष्मं निष्प्रपंचं निरीहं
गगनसदृशमीशं सर्वभूताधिवासम् ।
त्रिगुणरहितसच्चिद्ब्रह्मरूपं वरेण्यं
विमलपरमहंसं रामकृष्णं भजामः ॥ २
वितरितुमवतीर्णं ज्ञानभक्तिप्रशांतीः
प्रणयगलितचित्तं जीवदुःखासहिष्णुम् ।
धृतसहजसमाधिं चिन्मयं कोमलांगं
विमलपरमहंसं रामकृष्णं भजामः ॥३

रामकृष्णप्रणामः

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे ।
अवतारवरिष्ठाय रामकृष्णाय ते नमः ॥

रामकृष्णस्तोत्रम्-१

आचंडालाप्रतिहतरयो यस्य प्रेमप्रवाहः
लोकातीतोऽप्यहह न जहौ लोककल्याणमार्गम् ।
त्रैलोक्येऽप्यप्रतिममहिमा जानकीप्राणबंधो
भक्त्या ज्ञानं वृतवरवपुः सीतया यो हि रामः ॥१

स्तब्धीकृत्य प्रलयकलितं वाहवोत्थं महांतं
हित्वा रात्रिं प्रकृतिसहजामंधतामिस्रमिश्राम् ।
गीतं शांतं मधुरमपि यः सिंहनादं जगर्ज
सोऽयं जातः प्रथितपुरुषो रामकृष्णस्त्विदानीम् ॥२
नरदेव देव जय जय नरदेव ॥

शक्तिसमुद्रसमुत्थतरंगं दर्शितप्रेमविजृंभितरंगम् ।
संशयराक्षसनाशमहास्त्रं यामि गुरुं शरणं भववैद्यम् ॥३
अद्वयतत्त्वसमाहितचित्तं प्रोज्ज्वलभक्तिपटावृतवृत्तम् ।
कर्मकलेवरमद्भुतचेष्टं यामि गुरुं शरणं भववैद्यम् ॥४
नरदेव देव जय जय नरदेव ॥

रामकृष्णस्तोत्रम्–२

ॐ ह्रीं ऋतं त्वमचलो गुणजिद्गुणेड्यो
नक्तंदिवं सकरुणं तव पादपद्मम् ।
मोहंकषं बहुकृतं न भजे यतोऽहं
तस्मात्त्वमेव शरणं मम दीनबंधो ॥१
भक्तिर्भगश्च भजनं भवभेदकारि
गच्छंत्यलं सुविपुलं गमनाय तत्त्वम् ।
वक्त्रोद्धृतं तु हृदि मे न च भाति किंचित्
तस्मात्त्वमेव शरणं मम दीनबंधो ॥२
तेजस्तरंति तरसा त्वयि तृप्ततृष्णा
रागे कृते ऋतपथे त्वयि रामकृष्णे ।
मर्त्यामृतं तव पदं मरणोर्मिनाशं
तस्मात्त्वमेव शरणं मम दीनबंधो ॥३

कृत्यं करोति कलुषं कुहकांतकारि
ष्णांतं शिवं सुविमलं तव नाम नाथ ।
यस्मादहं त्वशरणो जगदेकगम्य
तस्मात्त्वमेव शरणं मम दीनबंधो ॥४

रामकृष्णस्तवराजः

ओंकारवेद्यः पुरुषः पुराणो बुद्धेश्च साक्षी निखिलस्य जंतोः ।
यो वेत्ति सर्वं न च यस्य वेत्ता परात्मरूपो भुवि रामकृष्णः ॥१
न वेदगम्यो न च योगगम्यो ध्यानैर्न जापैर्न तपोऽभिरुग्रैः ।
ज्ञेयः कदापीह ततोऽवतीर्णो दयानिधे त्वं भुवि रामकृष्णः ॥२
मोक्षस्वरूपं तव धाम नित्यं यथा तदाप्नोति विशुद्धचित्तः ।
तथोपदेष्टाखिलतत्त्ववेत्ता त्वं विश्वधाता भुवि रामकृष्णः ॥३
भक्तेस्तथा शुद्धज्ञानस्य मार्गौ प्रदर्शितौ द्वौ भवमुक्तिहेतू ।
तयोर्गतानां ध्रुवनायकोऽसि त्वं मोक्षसेतुर्भुवि रामकृष्णः ॥४
गतिस्त्वमेका जगतां जडानां पुरा विसृष्टेश्चिदखंडरूपः ।
तद्वल्लये स्या अधुनासि तद्वत् त्वमादिदेवो भुवि रामकृष्णः ॥५
वर्णाश्रमाचारविहीनशांताः संन्यासिनो ज्ञानविधूतचित्ताः ।
ध्यायंति यं नित्यमभेददृष्ट्या स एव हि त्वं भुवि रामकृष्णः ॥६
तेजोमयं दर्शयसि स्वरूपं कोषांतरस्थं परमार्थतत्त्वम् ।
संस्पर्शमात्रेण नृणां समाधिं विधाय सद्यो भुवि रामकृष्णः ॥७
रागादिशून्यां तव सौम्यमूर्तिं दृष्ट्वा पुनश्चात्र न जन्मभाजः ।
स्थाने यदादाय विशुद्धसत्त्वमिहावतीर्णो भुवि रामकृष्णः ॥८
महाविचित्रं महदादिकार्यं लब्ध्वाप्यधिष्ठानमनाद्यनंतम् ।
करोति नित्या प्रकृतिस्तवाद्या तद्ब्रह्म सच्चिद् भुवि रामकृष्णः ॥९

कृशानुवत्तापविदग्धचित्ताः संसारिणः शांतिनिकेतनं त्वाम् ।
संप्राप्य शांता हि भवंति तेषां त्वं शांतिदाता भुवि रामकृष्णः ॥१०
षडंगयोगो न यतः सुसाध्यो ज्ञानाधिकारी सुलभो न यस्मात् ।
गरीयसी भक्तिरतः कलौ स्यात् तज्ज्ञापकस्त्वं भुवि रामकृष्णः ॥११
नाकादिलोकं सुखदं च दिव्यं सुरम्यमैश्वर्यमहं न याचे ।
हृदासने त्वं कृपया सदा वै वसेति याचे भुवि रामकृष्णः ॥१२
यं ब्रह्मविष्णू गिरिशश्च देवा ध्यायंति गायंति नमंति नित्यम् ।
तैः प्रार्थितस्तस्य परावतारो द्विबाहुधारी भुवि रामकृष्णः ॥१३
वंदे जगद्बीजमखंडमेकं वंदे सुरैः सेवितपादपीठम् ।
वंदे भवेशं भवरोगवैद्यं तमेव वंदे भुवि रामकृष्णम् ॥१४

रामकृष्णं चिदानंदं यः स्तौति भक्तिमान्सदा ।
तस्य चित्तं भवेच्छुद्धं तत्त्वज्ञानं स्वयं ततः ॥१५

रामकृष्णाष्टकम्

विश्वस्य धाता पुरुषस्त्वमाद्योऽव्यक्तेन रूपेण ततं त्वयेदम् ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥१
त्वं पासि विश्वं सृजसि त्वमेव त्वमादिदेवो विनिहंसि सर्वम् ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥२
मायां समाश्रित्य करोषि लीलां भक्तान्समुद्धर्तुमनंतमूर्तिः ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥३
विधृत्य रूपं नरवत्त्वया वै विज्ञापितो धर्म इहातिगुह्यः ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥४
तपोऽथ ते त्यागमदृष्टपूर्वं दृष्ट्वा नमस्यंति कथं न विज्ञाः ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥५

श्रुत्वात्र ते नाम भवंति भक्ता दृष्ट्वा वयं त्वां न तु भक्तियुक्ताः ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥६
सत्यं विभुं शांतमनादिरूपं प्रसादये त्वामजमंतशून्यम् ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥७
जानामि तत्त्वं न हि देशिकेंद्र किं ते स्वरूपं किमु भावजातम् ।
हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम् ॥८

रामकृष्णस्तोत्रदशकम्

ब्रह्मरूपमादिमध्यशेषसर्वभासकं
भावषट्कहीनरूप-नित्यसत्यमद्वयम् ।
वाङ्मनोऽतिगोचरं च नेतिनेतिभावितं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥१
आदितेयभीहरं सुरारिदैत्यनाशकं
साधुशिष्टकामदं महीसुभारहारकम् ।
स्वात्मरूपतत्त्वकं युगे युगे च दर्शितं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥२
सर्वभूतसर्गकर्मसूत्रबंधकारणं
ज्ञानकर्मपापपुण्यतारतम्यसाधनम् ।
बुद्धिवास-साक्षिरूप-सर्वकर्मभासनं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥३
सर्वजीवपापनाशकारणं भवेश्वरं
स्वीकृतं च गर्भवासदेहधानमीदृशम् ।
यापितं स्वलीलया च येन दिव्यजीवनं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥४

तुल्यलोष्टकांचनं च हेयनेयधीगतं
स्त्रीषु नित्यमातृरूपशक्तिभावभावुकम् ।
ज्ञानभक्तिभुक्तिमुक्तिशुद्धबुद्धिदायकं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥५

सर्वधर्मगम्यमूलसत्यतत्त्वदेशकं
सिद्धसर्वसंप्रदाय-संप्रदायवर्जितम् ।
सर्वशास्त्रमर्मदर्शि-सर्वविन्निरक्षरं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥६

चारुदर्श-कालिकासुगीतचारुगायकं
कीर्तनेषु मत्तवच्च नित्यभावविह्वलम्।
सूपदेशदायकं हि शोकतापवारकं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥७

पादपद्मतत्त्वबोधशांतिसौख्यदायकं
सक्तचित्तभक्तसूनुनित्यवित्तवर्धकम् ।
दम्भिदर्पदारणं तु निर्भयं जगद्गुरुं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥८

पंचवर्षवालभावयुक्त-हंसरूपिणं
सर्वलोकरंजनं भवाब्धिसंगभंजनम् ।
शांतिसौख्यसद्म-जीवजन्मभीतिनाशनं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥९

धर्महानहारकं स्वधर्मकर्मवारकं
लोकधर्मचारणं च सर्वधर्मकोविदम् ।
त्यागिगेहिसेव्यनित्यपावनांघ्रिपंकजं
तं नमामि देवदेव-रामकृष्णमीश्वरम् ॥१०

स्तोत्रशून्यसोमकं सदीशभावव्यंजकं
नित्यपाठकस्य वै विपत्तिपुंजनाशकम् ।
स्यात्कदापि जापयागयोगभोगसौलभं
दुर्लभं तु रामकृष्णरागभक्तिभावनम् ॥११

इति श्रीविरजानंदरचितं भक्तिसाधकम् ।
स्तवसारं समाप्तं वै श्रीरामकृष्णतूणकम् ॥१२

रामकृष्णषट्कम्

विशुद्धविज्ञानमगाधसौख्यं विश्वस्य बीजं करुणापयोधिः ।
अनाद्यनंतं प्रकृतेः परस्तात् तत्तत्त्वमेकं भुवि रामकृष्णः ॥१
न नेति भीत्या श्रुतयो वदंति वदंति साक्षान्न च यं कदाचित् ।
चिदेकरूपः शिव ईश्वराणां महेश्वरोऽसौ भुवि रामकृष्णः ॥२
यं नित्यमानंदमनंतमेकं शिवेति नाम्ना श्रुतयो गृणंति ।
तस्यावतारो नररूपधारी कृपासुधाब्धिर्भुवि रामकृष्णः ॥३
विज्ञानपीयूषनिमग्नमूर्तिः पस्पर्श यान् यान् दयया करेण ।
ते कामिनीकांचनरिक्तचित्ताः सद्यो वभूवुर्भुवि रामकृष्णः ॥४
प्रेमाब्धिगंभीरतरंगभंगैरांदोलितो यो भगवद्विलीनः ।
भक्तिर्विशुद्धा स्वयमाविरासीत् पुंविग्रहोऽहो भुवि रामकृष्णः ॥५
तमद्भुतं कंचिदचिंत्यशक्तिं वंदे प्रशांतं परिपूर्णबोधम् ।
ज्ञानस्य भक्तेश्च विशुद्धमूर्ति द्विमूर्तिमेकं भुवि रामकृष्णम् ॥६

रामकृष्णसुप्रभातम्

धर्मस्य हानिमभितः परिदृश्य शीघ्रं
कामारपुष्कर इति प्रथिते समृद्धे ।
ग्रामे सुविप्रसदने ह्यभिजात देव
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥१

बाल्ये समाध्यनुभवः सितपक्षिपंक्ति
संदृश्य मेघपटले समवापि येन ।
ईशैक्यवेदनसुखं शिवरात्रिकाले
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥२

नानाविधानयि सनातनधर्ममार्गान्
क्रैस्तादिचित्रनियमान् परदेशधर्मान् ।
आस्थाय चैक्यमनयोरनुभूतवांस्त्वं
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥३

हे कालिकापदसरोरुहकृष्णभृंग
मातुः समस्तजगतामपि शारदायाः ।
ऐक्यं ह्यदर्शि तरसा परमं त्वयैव
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥४

राखालतारकहरीश्च नरेंद्रनाथम्
अन्यान् विशुद्धमनसः शशिभूषणादीन् ।
सर्वज्ञ आत्मवयुनं त्वमिहानुशास्सि
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥५

नित्यं समाधिजसुखं निजबोधरूपम्
आस्वादयन् तव पदे शरणागतांश्च ।
आनंदयन् प्रशमयन्नुपतिष्ठसे त्वं
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥६

स्वीकृत्य पापमखिलं शरणागतैर्यद्
आजीवनं वहुकृतं दयया स्वदेहे ।
तज्जातखेदनिवहं सहसे स्म नाथ
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥७

प्रातः प्रणामकरणं तव पादपद्मे
संसारदुःखहरणं सुलभं करोति ।
मत्वेति भक्तिभरिताः प्रतिपालयंति
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥८

गातुं स्तुतीस्तव जना अमृतायमानाः
संप्राप्य दर्शनमिदं तव पादयोश्च ।
धन्या नरेश भवितुं मिलिताः समीपं
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥९

संदाय दर्शनसुखं शरणागतेभ्यो
मोहांधकारमखिलं त्वमपाकुरुष्व ।
ज्ञानार्क भक्तिजलधे सकलार्तिहंतः
श्रीरामकृष्णभगवन् तव सुप्रभातम् ॥१०

आहैतुकीति करुणा किल ते स्वभावो
दुष्टाः कठोरहृदया अपि ते भजंते ।
त्वामेव सर्वजगतां जननि प्रपात्रि
श्रीसारदेश्वरि रमे तव सुप्रभातम् ॥११

सुप्तांस्तु भारतजनान् स्ववचः प्रहारै-
रुद्बोधयन् विवशयन् निजधर्ममार्गे ।
प्रोत्साहयन् परमतां प्रकटीकरोषि
वीरेशदत्तमहिमन् तव सुप्रभातम् ॥१२

सपार्षद-रामकृष्णस्तोत्रम्

सर्वधर्मस्थापकस्त्वं सर्वधर्मस्वरूपकः ।
आचार्याणां महाचार्यो रामकृष्णाय ते नमः ॥१
यथाग्नेर्दाहिकाशक्ती रामकृष्णे स्थिता हि या ।
सर्वविद्यास्वरूपां तां सारदां प्रणमाम्यहम् ॥२
परतत्त्वे सदा लीनो रामकृष्णसमाज्ञया ।
यो धर्मस्थापनरतो वीरेशं तं नमाम्यहम् ॥३
कालिंदीफुल्लकमले माधवेन क्रीडारत ।
ब्रह्मानंद नमस्तुभ्यं सद्गुरो लोकनायक ॥४
योगानंदः प्रेमानंदश्चान्ये वै ये च पार्षदाः ।
रामकृष्णगतप्राणाः सर्वांस्तान्प्रणमाम्यहम् ॥५

रामकृष्णप्रणतिः

ब्रह्मानंदं शिवं शांतं प्रेमरूपं निरंजनम् ।
योगीशमद्भुतं नित्यमखंडाद्वैतलक्षणम् ॥
विज्ञानं त्रिगुणातीतं तुरीयाभेदसंज्ञितम् ।
सुबोधं सारदं चैव विवेकशशिभूषणम् ॥
समन्वयमहाचार्यं युगधर्मस्वरूपिणम् ।
सर्वदेवस्वरूपं श्रीरामकृष्णं नमाम्यहम् ॥

सारदादेवीध्यानम्

ध्यायेच्चित्तसरोजस्थां सुखासीनां कृपामयीम् ।
प्रसन्नवदनां देवीं द्विभुजां स्थिरलोचनाम् ॥१
आलुलायितकेशार्धवक्ष:स्थलविमंडिताम् ।
श्वेतवस्त्रावृताधांगां हेमालंकारभूषिताम् ॥२
स्वक्रोडन्यस्तहस्तां च ज्ञानभक्तिप्रदायिनीम् ।
शुभ्रां ज्योतिर्मयीं जीवपापसंतापहारिणीम् ॥३
रामकृष्णगतप्राणां तन्नामश्रवणप्रियाम् ।
तद्भावरंजिताकारां जगन्मातृस्वरूपिणीम् ॥४
जानकीराधिकारूपधारिणीं सर्वमंगलाम् ।
चिन्मयीं वरदां नित्यां सारदां मोक्षदायिनीम् ॥५

सारदादेवीप्रणाम:

यथाग्नेर्दाहिकाशक्ती रामकृष्णे स्थिता हि या ।
सर्वविद्यास्वरूपां तां सारदां प्रणमाम्यहम् ॥

सारदादेवीस्तोत्रम्

प्रकृतिं परमामभयां वरदां नररूपधरां जनतापहराम् ।
शरणागतसेवकतोषकरीं प्रणमामि परां जननीं जगताम् ॥१
गुणहीनसुतानपराधयुतान् कृपयाद्य समुद्धर मोहगतान् ।
तरणीं भवसागरपारकरीं प्रणमामि परां जननीं जगताम् ॥२
विषयं कुसुमं परिहृत्य सदा चरणांबुरुहामृतशांतिसुधाम् ।
पिब भृंगमनो भवरोगहरां प्रणमामि परां जननीं जगताम् ॥३

कृपां कुरु महादेवि सुतेषु प्रणतेषु च ।
चरणाश्रयदानेन कृपामयि नमोऽस्तु ते ॥४
लज्जापटावृते नित्यं सारदे ज्ञानदायिके ।
पापेभ्यो नः सदा रक्ष कृपामयि नमोऽस्तु ते ॥५
रामकृष्णगतप्राणां तन्नामश्रवणप्रियाम् ।
तद्भावरंजिताकारां प्रणमामि मुहुर्मुहुः ॥६
पवित्रं चरितं यस्याः पवित्रं जीवनं तथा ।
पवित्रतास्वरूपिण्यै तस्यै कुर्मो नमो नमः ॥७
देवीं प्रसन्नां प्रणतार्तिहंत्रीं योगींद्रपूज्यां युगधर्मपात्रीम् ।
तां सारदां भक्तिविज्ञानदात्रीं दयास्वरूपां प्रणमामि नित्यम् ॥८
स्नेहेन बध्नासि मनोऽस्मदीयं दोषानशेषान्सगुणीकरोषि ।
अहेतुना नो दयसे सदोषान् स्वांके गृहीत्वा यदिदं विचित्रम् ॥९
प्रसीद मातर्विनयेन याचे नित्यं भव स्नेहवती सुतेषु ।
प्रेमैकबिंदुं चिरदग्धचित्ते विषिंच चित्तं कुरु नः सुशांतम् ॥१०
जननीं सारदां देवीं रामकृष्णं जगद्गुरुम् ।
पादपद्मे तयोः श्रित्वा प्रणमामि मुहुर्मुहुः ॥११

विवेकानंदध्यानम्

विश्वाचार्यं जगद्वंद्यं विवेकानंदरूपिणम् ।
वीरेश्वरात्समुत्पन्नं सप्तर्षिमंडलागतम् ॥
ज्ञानभक्तिप्रदातारं पद्माक्षगौरविग्रहम् ।
ध्यायेद्देवं ज्योतिःपुंजं लोककल्याणकारिणम् ॥

विवेकानंदप्रणामः

परतत्त्वे सदा लीनो रामकृष्णसमाज्ञया ।
यो धर्मस्थापनरतो वीरेशं तं नमाम्यहम् ॥

विवेकानंदपंचकम्

अनित्यदृश्येषु विविच्य नित्यं तस्मिन्समाधत्त इह स्म लीलया ।
विवेकवैराग्यविशुद्धचित्तं योऽसौ विवेकी तमहं नमामि ॥१
विवेकजानंदनिमग्नचित्तं विवेकदानैकविनोदशीलम् ।
विवेकभासा: कमनीयकांतिं विवेकिनं तं सततं नमामि ॥२
ऋतं च विज्ञानमधिश्रयद्यन्निरंतरं चादिमध्यांतहीनम् ।
सुखं सुरूपं प्रकरोति यस्य आनंदमूर्तिं तमहं नमामि ॥३
सूर्यो यथांधं हि तमो निहंति विष्णुर्यथा दुष्टजनांश्छिनत्ति ।
तथैव यस्याखिलनेत्रलोभं रूपं त्रितापं विमुखीकरोति ॥४
तं देशिकेंद्रं परमं पवित्रं विश्वस्य पालं मधुरं यतींद्रम् ।
हिताय नृणां नरमूर्तिमंतं विवेक आनंदमहं नमामि ॥५

नमः श्रीयतिराजाय विवेकानंदसूरये ।
सच्चित्सुखस्वरूपाय स्वामिने तापहारिणे ॥६

विवेकानंद-प्रभातप्रांजलिः

समाधिस्थः शिवः स्वलोके निर्भरं जनानां क्रंदनाद् भवाग्नौ भीषणे ।
प्रदग्धानां प्रबोधितस्त्वं ह्यागतः विवेकानंद ते प्रभाते प्रांजलिः ॥१
नरेंद्रः शैशवे नरेंद्रो यौवने नरेंद्रः क्रीडने नरेंद्रः शिक्षणे ।
नरेंद्रः पालने नरेंद्रो ह्यर्पणे विवेकानंद ते प्रभाते प्रांजलिः ॥२
हरींद्रश्चेष्टितैः कलाज्ञो गायनैः परिज्ञानैर्बुधो महर्षिर्दर्शनैः ।
यतींद्रोऽसक्तिभिर्भवान्यन्नास्ति किं विवेकानंद ते प्रभाते प्रांजलिः॥३
मुमुक्षा दर्शिताभिहंसं धावनैः विनैकां पादुकां नितांतोन्मत्तवत् ।
समानां देहि मे मुमुक्षां मद्गुरो विवेकानंद ते प्रभाते प्रांजलिः ॥४
गुरोरंघ्रचुत्पले स्वमात्मानं ददौ परीक्ष्यानंतरं बहुप्रश्नैर्भृशम् ।
विशुद्धैः सेवनैर्भवांस्तं पिप्रिये विवेकानंद ते प्रभाते प्रांजलिः ॥५
सुगंधः श्रीगुरुर्भवान्वायुः खलु स तूर्यं त्वं च भो महोच्चैर्घोषकः ।
गुरुः सूर्यस्तु हे किलादर्शो भवान् विवेकानंद ते प्रभाते प्रांजलिः ॥६
स्वधर्मश्रेष्ठतां सगर्वं शंसतां जनानां धृष्टता त्वयैवाभाज्यहो ।
स्वधर्मो वैदिको ह्यनर्घो दर्शितः विवेकानंद ते प्रभाते प्रांजलिः ॥७
स्फुलिंगान्स्फोटयन् सुदीप्ताग्निर्यथा तथैव त्वं यते विकीर्य मानुषीम् ।
परिज्ञानप्रभामचारीर्भारते विवेकानंद ते प्रभाते प्रांजलिः ॥८
अहो आकर्षणं तवास्यस्यातुलं तवाहो पौरुषं विरागो मुग्धता ।
प्रगाढं प्रेम च ह्यगाधं वेदनं विवेकानंद ते प्रभाते प्रांजलिः ॥९
विमोक्षं स्वात्मनश्चतुर्योगाध्वभिः पृथग्वा संहतैर्हितं लोकस्य च ।
तवाज्ञा साधयेदिति प्रीत्या नरः विवेकानंद ते प्रभाते प्रांजलिः॥१०
यतेऽनूरुस्तव प्रणामं दास्यति प्रफुल्लं षट्पदैः प्रसूनं प्रावृतम् ।
तवार्थं कोकिलो मनोज्ञं कूजति विवेकानंद ते प्रभाते प्रांजलिः ॥११

उषःकाले पदे नमस्कृत्याशिषा लभेरन् धन्यतामिति श्रद्धालवः ।
समेताः संमुखे ददेथाः दर्शनं विवेकानंद ते प्रभाते प्रांजलिः ॥१२

हिमाद्रेराश्रमे जयंत्यां निर्मितः भुजंगस्रग्विणीतिवृत्ते नूतने ।
स्तवोऽयं यः पठेत्सभक्त्या तं नरः स शक्ति पौरुषं विरागं चार्जति ॥

विवेकानंद-गीतिस्तोत्रम्

मूर्तमहेश्वरमुज्ज्वलभास्करमिष्टममरनरवंद्यम् ।
वंदे वेदतनुमुज्झितगर्हितकांचनकामिनीबंधम् ॥१
कोटिभानुकरदीप्तसिंहमहोकटितटकौपीनवंतम् ।
अभीरभीहुंकारनादितदिङ्मुखप्रचंडतांडवनृत्यम् ॥२
भुक्तिमुक्तिकृपाकटाक्षप्रेक्षणमघदलविदलनदक्षम् ।
बालचंद्रधरमिंदुवंद्यमिह नौमि गुरुविवेकानंदम् ॥३

परब्रह्मणः प्रातःस्मरणस्तोत्रम्

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तमवैति नित्यं
तद्ब्रह्म निष्कलमहं न च भूतसंघः ॥१

प्रातर्भजामि मनसो वचसामगम्यं
वाचो विभांति निखिला यदनुग्रहेण ।
यन्नेतिनेतिवचनैर्निगमा अवोचु-
स्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥२

प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजंगम इव प्रतिभासितं वै ॥३

श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥४

परब्रह्मस्तोत्रम्

नमस्ते सते सर्वलोकाश्रयाय नमस्ते चिते विश्वरूपात्मकाय ।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय नमो ब्रह्मणे व्यापिने निर्गुणाय ॥१
त्वमेकं शरण्यं त्वमेकं वरेण्यं त्वमेकं जगत्कारणं विश्वरूपम् ।
त्वमेकं जगत्कर्तृपातृप्रहर्तृ त्वमेकं परं निष्कलं निर्विकल्पम् ॥२
भयानां भयं भीषणं भीषणानां गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैःपदानां नियंतृ त्वमेकं परेषां परं रक्षकं रक्षकाणाम् ॥३

परेश प्रभो सर्वरूपाविनाशिन्ननिर्देश्य सर्वेंद्रियागम्य सत्य।
अचिंत्याक्षर व्यापकाव्यक्ततत्त्व जगद्भासकाधीश पायादपायात् ॥४
तदेकं स्मरामस्तदेकं भजामस्तदेकं जगत्साक्षिरूपं नमामः।
सदेकं निधानं निरालंबमीशं भवांभोधिपोतं शरण्यं व्रजामः ॥५

पंचरत्नमिदं स्तोत्रं ब्रह्मणः परमात्मनः।
यः पठेत्प्रयतो भूत्वा ब्रह्मसायुज्यमाप्नुयात् ॥६

निर्वाणषट्कम्

मनोबुद्ध्यहंकारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे।
न च व्योमभूमी न तेजो न वायु-
श्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥१
न च प्राणसंज्ञो न वै पंचवायु-
र्न वा सप्तधातुर्न वा पंचकोषाः।
न वाक्पाणिपादं न चोपस्थपायू
चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥२
न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः।
न धर्मो न चार्थो न कामो न मोक्ष-
श्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥३
न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्थं न वेदा न यज्ञाः।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥४

न मृत्युर्न शंका न मे जातिभेदः
पिता नैव मे नैव माता न जन्म ।
न बंधुर्न मित्रं गुरुर्नैव शिष्य-
श्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥५

अहं निर्विकल्पो निराकाररूपो
विभुत्वाच्च सर्वत्र सर्वेंद्रियाणाम् ।
न चासंगतं नैव मुक्तिर्न मेय-
श्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥६

प्रज्ञापारमितासूत्रम्

निर्विकल्पे नमस्तुभ्यं प्रज्ञापारमितेऽमिते ।
या त्वं सर्वानवद्यांगि निरवद्यैर्निरीक्ष्यसे ॥१
आकाशमिव निर्लेपां निष्प्रपंचां निरक्षराम् ।
यस्त्वां पश्यति भावेन स पश्यति तथागतम् ॥२
तव चार्यगुणाढ्याया बुद्धस्य च जगद्गुरोः ।
न पश्यंत्यंतरं संतश्चंद्रचंद्रिकयोरिव ॥३
कृपात्मकाः प्रपद्य त्वां बुद्धधर्मपुरःसरीम् ।
सुखेनायांति माहात्म्यमतुलं भक्तिवत्सले ॥४
सकृदप्याशये शुद्धे यस्त्वां विधिवदीक्षते ।
तेनापि नियतं सिद्धिः प्राप्यतेऽमोघदर्शने ॥५
सर्वेषामपि वीराणां परार्थनियतात्मनाम् ।
याधिका जनयित्री च माता त्वमसि वत्सला ॥६
यद्बुद्धा लोकगुरवः पुत्रास्तव कृपालवः ।
तेन त्वमपि कल्याणि सर्वसत्त्वपितामही ॥७
सर्वपारमिताभिस्त्वं निर्मलाभिरनिंदिते ।
चंद्रलेखेव ताराभिरनुयातासि सर्वदा ॥८
विनेयं जनमासाद्य तत्र तत्र तथागतः ।
बहुरूपा त्वमेवैका नानानामभिरीडचसे ॥९
प्रभां प्राप्येव दीप्तांशोरवश्यायोदबिंदवः ।
त्वां प्राप्य प्रलयं यांति दोषा वादाश्च वादिनाम् ॥१०
त्वमेव त्रासजननी बालानां भीमदर्शना ।
आश्वासजननी चासि विदुषां सौम्यदर्शना ॥११

यस्य त्वय्यप्यभिष्वंगस्त्वन्नाथस्य न विद्यते ।
तस्यांव कथमन्यत्र रागद्वेषौ भविष्यतः ॥१२
नागच्छसि कुतश्चित्त्वं न च क्वचन गच्छसि ।
स्थानेष्वपि च सर्वेषु विद्वद्भिर्नोपलभ्यसे ॥१३
ये त्वामेवं न पश्यंति प्रपद्यंते च भावतः ।
प्रपद्य च विमुच्यंते तदिदं महदद्भुतम् ॥१४
त्वामेव बध्यते पश्यन्नपश्यन्नपि बध्यते ।
त्वामेव मुच्यते पश्यन्नपश्यन्नपि मुच्यते ॥१५
अहो विस्मयनीयासि गंभीरासि यशस्विनी ।
सुदुर्बोधासि मायेव दृश्यसे न च दृश्यसे ॥१६
बुद्धैः प्रत्येकबुद्धैश्च श्रावकैश्च निषेविता ।
मार्गस्त्वमेका मोक्षस्य नास्त्यन्य इति निश्चयः ॥१७
व्यवहारं पुरस्कृत्य प्रज्ञप्त्यर्थं शरीरिणाम् ।
कृपया लोकनाथैस्त्वमुच्यसे न च चोच्यसे ॥१८
शक्तः कस्त्वामिह स्तोतुं निर्निमित्तां निरंजनाम् ।
सर्ववाग्विषयातीतां या त्वं क्वचिदनिश्रिता ॥१९
सत्येवमपि संवृत्या वाक्पथैर्वयमीदृशैः ।
त्वामस्तुत्यामपि सतीं तुष्टुवंतः सुनिर्वृताः ॥२०
प्रज्ञापारमितां स्तुत्वा यन्मयोपचितं शुभम् ।
तेनास्त्वाशु जगत्कृत्स्नं प्रज्ञापारपरायणम् ॥२१

शिक्षाष्टकम्

चेतोदर्पणमार्जनं भवमहादावाग्निनिर्वापणं
श्रेय:कैरवचंद्रिकावितरणं विद्यावधूजीवनम् ।
आनंदांबुधिवर्धनं प्रतिपदं पूर्णामृतास्वादनं
सर्वात्मस्नपनं परं विजयते श्रीकृष्णसंकीर्तनम् ॥१

नाम्नामकारि बहुधा निजसर्वशक्ति-
स्तत्रार्पिता नियमितः स्मरणे न कालः ।
एतादृशी तव कृपा भगवन् ममापि
दुर्दैवमीदृशमिहाजनि नानुरागः ॥२

तृणादपि सुनीचेन तरोरपि सहिष्णुना ।
अमानिना मानदेन कीर्तनीयः सदा हरिः ॥३

न धनं न जनं न सुंदरीं कवितां वा जगदीश कामये ।
मम जन्मनि जन्मनीश्वरे भवताद् भक्तिरहैतुकी त्वयि ॥४

अयि नंदतनूज किंकरं पतितं मां विषमे भवांबुधौ ।
कृपया तव पादपंकजस्थितधूलीसदृशं विचिंतय ॥५

नयनं गलदश्रुधारया वदनं गद्‌गदरुद्धया गिरा ।
पुलकैर्निचितं वपुः कदा तव नामग्रहणे भविष्यति ॥६

युगायितं निमेषेण चक्षुषा प्रावृषायितम् ।
शून्यायितं जगत्सर्वं गोविंदविरहेण मे ॥७

आश्लिष्य वा पादरतां पिनष्टु माम् अदर्शनान्मर्महतां करोतु वा ।
यथा तथा वा विदधातु लंपटो मत्प्राणनाथस्तु स एव नापरः ॥८

शंकरदेशिकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं भव शंकर देशिक मे शरणम् ॥१

करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं भव शंकर देशिक मे शरणम् ॥२

भवता जनता सुहिता भविता निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकविदं भव शंकर देशिक मे शरणम् ॥३

भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं भव शंकर देशिक मे शरणम् ॥४

सुकृतेऽधिकृते बहुधा भवतो भविता पददर्शनलालसता ।
अतिदीनमिमं परिपालय मां भव शंकर देशिक मे शरणम् ॥५

जगतीमवितुं कलिताकृतयो विचरंति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि पुरो भव शंकर देशिक मे शरणम् ॥६

गुरुपुंगव पुंगवकेतन ते समतामयतां न हि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे भव शंकर देशिक मे शरणम् ॥७

विदिता न मया विशदैककला न च किंचन कांचनमस्ति गुरो ।
द्रुतमेव विधेहि कृपां सहजां भव शंकर देशिक मे शरणम् ॥८

चर्पटपंजरिकास्तोत्रम्

दिनमपि रजनी सायं प्रातः शिशिरवसंतौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥
भज गोविंदं भज गोविंदं गोविंदं भज मूढमते ।
प्राप्ते संनिहिते मरणे न हि न हि रक्षति डुकृञ् करणे॥ (ध्रुवपदम्)

अग्रे वह्निः पृष्ठे भानू रात्रौ चिबुकसमर्पितजानुः ।
करतलभिक्षा तरुतलवासस्तदपि न मुंचत्याशापाशः ।। भज०।।२
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे ।। भज०।।३
जटिलो मुंडी लुंचितकेशः काषायांवर बहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ।। भज०।।४
भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ।
सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम्।।भज०।।५
अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुंडम् ।
वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशापिंडम् ।। भज०।।६
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिंतामग्नः परमे ब्रह्मणि कोऽपि न लग्नः ।। भज०।।७
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे खलु दुस्तारे कृपयाऽपारे पाहि मुरारे ।। भज०।।८
पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ।
पुनरप्ययनं पुनरपि वर्षं तदपि न मुंचत्याशामर्षम् ।। भज०।।९
वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ।। भज०।।१०
नारीस्तनभरणाभिनिवेशं मिथ्यामायामोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् ।। भज०।।११
कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम्।।भज०।।१२
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् ।। भज०।।१३

यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन् काये ॥ भज०॥१४
सुखतः क्रियते रामाभोगः पश्चाद्धंत शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुंचति पापाचरणम् ।भज०॥१५
रथ्याचर्पटविरचितकंथः पुण्यापुण्यविवर्जितपंथः ।
नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः ॥ भज०॥१६
कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन ॥ भज०॥१७

द्वादशपंजरिकास्तोत्रम् (मोहमुद्गरः)

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥१
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः ॥२
का ते कांता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिंतय यदिदं भ्रातः ॥३
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥४
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यंते नरकनिगूढाः ॥५
सुरमंदिरतरुमूलनिवासः शय्याभूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥६
शत्रौ मित्रे पुत्रे बंधौ मा कुरु यत्नं विग्रहसंधौ ।
भव समचित्तः सर्वत्र त्वं वांछस्यचिराद्यदि विष्णुत्वम् ॥७

त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥८
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥९
नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥१०
का तेऽष्टादशदेशे चिंता वातुल तव किं नास्ति नियंता ।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥११
गुरुचरणांबुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेंद्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥१२
द्वादशपंजरिकामय एष शिष्याणां कथितो ह्युपदेशः ।
येषां चित्ते नैव विवेकस्ते पच्यंते नरकमनेकम् ॥१३

परापूजा

अखंडे सच्चिदानंदे निर्विकल्पैकरूपिणि ।
स्थितेऽद्वितीयभावेऽस्मिन् कथं पूजा विधीयते ॥१
पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥२
निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥३
निर्लेपस्य कुतो गंधः पुष्पं निर्वासनस्य च ।
निर्विशेषस्य का भूषा कोऽलंकारो निराकृतेः ॥४
निरंजनस्य किं धूपैर्दीपैर्वा सर्वसाक्षिणः ।
निजानंदैकतृप्तस्य नैवेद्यं किं भवेदिह ॥५

विश्वानंदयितुस्तस्य किं तांबूलं प्रकल्प्यते ।
स्वयंप्रकाशचिद्रूपो योऽसावर्कादिभासकः ॥६
प्रदक्षिणा ह्यनंतस्य ह्यद्वयस्य कुतो नतिः ।
वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥७
स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः ।
अंतर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ॥८
एवमेव परापूजा सर्वावस्थासु सर्वदा ।
एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ॥९
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विविधोपभोगरचना निद्रा समाधिस्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥१०

कल्याणप्रार्थना

सर्वेऽत्र सुखिनः संतु सर्वे संतु निरामयाः ।
सर्वे भद्राणि पश्यंतु मा कश्चिद्दुःखमाप्नुयात् ॥
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः सद्बुद्धिमाप्नोतु सर्वः सर्वत्र नंदतु ॥
दुर्जनः सज्जनो भूयात्सज्जनः शांतिमाप्नुयात् ।
शांतो मुच्येत बंधेभ्यो मुक्तश्चान्यान् विमोचयेत् ॥
स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायंतु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे
आवेश्यतां नो मतिरप्यहैतुकी ॥

शुद्धिपत्रकम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१	१३	विष्णुरुक्रमः	विष्णुरुरुक्रमः
३	१५	मनासि	मनांसि
१८	७	यात्यनिभतजटा	यात्यनिभृतजटा
२३	१३	दुग्धर्मध्वाज्य	दुग्धैर्मध्वाज्य
४४	७	जत्पात्ताति	जगत्पातात्ति
६४	२२	कांवा	क्वांवा
७८	७	भरतवदितः	भरतवंदितः
८२	१८	ब्राह्म	ब्राह्मं
८२	२३	वत्सल	वत्सलं

तन्नो हंसः प्रचोदयात्

शिवराज फाईन आर्ट लिथो वर्क्स, नागपूर
(विदर्भ विकास महामंडळद्वारा संचालित)